मेघदूतम्।

महाकवि श्रीकालिदास कृतम्।

श्रीमल्लिनाथसूरि विरचितया सञ्जीवनी
समाख्यया व्याख्यया
सहितम्।

तृतीय संस्करणम्।

कलिकाता राजधान्याम्

निमतलाघाट ष्ट्रीट ८ संख्यक भवने
श्रीयुक्त बाबु भुवनचन्द्र वसाकेन प्रकाशितम्।

६६ नं सिमलाष्ट्रीट रासायण-यन्त्रे
श्रीक्षीरोदनाथ घोष द्वारा
मुद्रितम्।

१२८१

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मेघदूतम्।

महाकवि श्रीकालिदास प्रणीतम्।

श्रीमल्लिनाथसूरिविरचितया सञ्जीवनी

समाख्यया व्याख्यया

सहितम्।

तृतीय संस्करणम्।

कलिकाता राजधान्याम्।

निमतलाघाट ष्ट्रीट ८ संख्यक भवने

श्रीयुक्त बाबु भुवनचन्द्र वसाकेन प्रकाशितम्।

६६नं सिमलाष्ट्रीट रामायण-यन्त्रे

श्रीजीरोदनाथ घोष द्वारा

मुद्रितम्।

१२८२

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मेघदूतटीकासञ्जीवनी ।

मङ्गलाचरणम् ।

मातापितृभ्यां जगतो नमो वामार्द्धजानये ।
सद्यो दक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥ १ ॥

अन्तराय तिमिरोपशान्तये
प्राप्तपावनमचिन्त्यवैभवम् ।
तत्वरं वपुषि कुञ्जरं
मुखे मन्महे किमपि तुन्दिलं महः ॥ २ ॥

शरणं करवाणि शर्म्मदं
ते चरणं वाणि ! चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः
कुरुमामम्ब ! कृतार्थसार्थवाहम् ॥ ३ ॥

प्रतिज्ञा ।

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥ ४ ॥
भारतो कालिदासस्य दुर्व्याख्याविषमूर्च्छिता ।
एषा सञ्जीवनी व्याख्यातामद्योज्जीवयिष्यति ॥ ५ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मेघदूतम्।

पूर्वमेघः।

कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥१॥

आज्ञोर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखेन शास्त्रात् काव्याद्वो वस्तुनिर्देशात् कथां पस्तावयति कश्चिदिति। स्वाधिकारात् स्वनियोगात् प्रमत्तः सावहित्थः प्रमादोऽनवधानतेत्यमरः। जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादानत्वात्पञ्चमी।) अतएवापराधात् हेतोः कान्ताविरहेण गुरुणा दुर्भरेण दुस्तरेणेत्यर्थः। (गुरुश्चाध्यापको श्रेष्ठे गुरौ पितरि दुर्भरे इति विश्वः। तेन भोग्येन। (कालाध्वनोरत्यन्तसंयोगे इति द्वितीया। अत्यन्तसंयोगे चेति समासः। क्रमणं चेति क्रमः। भर्तुः स्वामिनः शापेन अस्तंगमितो महिमा सामर्थ्यं यस्य सः अस्तंगमितमहिमा (अस्तमिति मकारान्तमव्ययम्। तस्य द्वितीयेति योगविभागात्समासः।)कश्चिद्निर्दिष्टनामा

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ।

देवयोनिविशेषः (विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनय इत्यमरः ।) जनकतनयायाः सीतायाः स्नानैरवगाहनैः पुण्यानि पवित्राणि उदकानि येषु तेषु पावनेषु इत्यर्थः । छायाप्रधानाःतरवः छायातरवः (शाकपार्थिवादित्वात्समासः ।) स्निग्धाः सान्द्राः छायातरवो नमेरुद्रुचा येषु तेषु वसतियोग्येषु इत्यर्थः (किंधन्तु मसृणे सान्द्रे इति छायाद्रुचो नमेरुः स्यादिति च शब्दार्णवे ।) रामगिरेश्चित्रकूटस्य आश्रमेषु वसतिम् (वहिवसर्त्तिभ्यश्चेत्यौणादिकोऽतिप्रत्ययः) चक्रे कृतवान् । अत्र रसो विप्रलम्भाख्यः शृङ्गारः तत्रापि उन्मादावस्था अतएवैकत्रानवस्थानं सूचितम् आश्रमेष्विति बहुवचनेन । सीतां प्रति रामस्य हनूमत्सन्देशं मनसि निधाय मेघसन्देशं कविः कृतवानित्याहुः । अत्र काव्ये सर्वत्र मन्दाक्रान्ता वृत्तम् । मन्दाक्रान्ता जलधि षड्गैर्भौ नतौ ताद्गुरू चेदिति ॥ १ ॥

तस्मिन्निति । तस्मिन् अद्रौ चित्रकूटाद्रौ अबला विप्रयुक्तः कान्ताविरही कनकस्य वलयः कटकम् (कटकं वलयोऽस्त्रियामित्यमरः । तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्परादधःप्रदेशो यस्य स तथोक्तः (कक्षान्तरे प्रकोष्ठः स्यात् प्रकोष्ठः कूर्पराद्ध इति शाश्वतः ।) विरह-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आषाढ़स्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीड़ापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

दुःखात् क्षय इत्यर्थः। कामी कामुकः सयक्षः कतिचित् मासान् अष्टौ मासानित्यर्थः मासानन्यान् गमय चतुर इति वक्ष्यमाणत्वात् नीत्वा यापयित्वा आषाढ़ाभिर्नक्षत्रेण युक्ता पौर्णमासी आषाढ़ी (नक्षत्रेण युक्तः काल इत्यण्। टिड्ढाणञित्यादिना ङीप्।) स आषाढी अस्मिन् पौर्णमासीत्याषाढ़ो मासः। (सास्मिन् पौर्णमासीति संज्ञायामित्यण्।) तस्य प्रथमदिवसे आश्लिष्टसानुमाक्रान्ततटम् वप्रक्रीड़ा उत्खातकेलयः (उत्खातकेलिः क्रीडायैर्वप्रक्रीडा निगद्यते इति शब्दार्णवे।) तासु परिणतस्तिर्यग्दन्तप्रहारः। (तिर्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः।) स चासौ गजश्च स इव प्रेक्षणीयो दर्शनीयः तं मेघं ददर्श। गजप्रेक्षणीयमित्यत्रेवलोपाल्लुप्तोपमा। केचिदाषाढ़स्य प्रथमदिवसे इत्यत्र प्रत्यासन्ने नभसीति वक्ष्यमाणनभोमासप्रत्यासत्त्यर्थः प्रथमदिवसे इति पाठं कल्पयन्ति तदसङ्गतम् प्रथमातिरेके कारणाभावात् नभोमासस्य प्रत्यासत्त्यर्थमिति चेन्न प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्यैव प्रथमदिवसस्याप्युपपत्तेः अत्यन्तप्रत्यासत्तेरुपयोगाभावेनाविवक्षितत्वात् विवक्षितत्वे वा स्वपक्षेऽपि प्रथमदिवसातिक्रमेण मेघदर्शनकल्पनायां प्रमाणाभावेन तदसम्भवात् प्रत्युत अश्लत्यक्षे एव कुशलसन्देशस्य भाव्यनर्थप्रतीकारार्थस्य पुरतएवानु-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

मानमुक्तं भवतीत्युपयोगसिद्धिः । ननु उन्मत्तस्य नायं विवेक इति चेन्न उन्मत्तस्य न अनर्थस्य प्रतीकारार्थं प्रवृत्तिरपीति सन्देश एव मा भूत् तथा च काव्यारम्भ एव अप्रसिद्धः स्यादित्यहो मूलोच्छेदी पाण्डित्यप्रकर्षः । कथं तर्हि शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणावित्यादिना भगवत्प्रबोधावधिकस्य शापस्य मासचतुष्टयावशिष्टस्योक्तिः दशदिवसाधिक्यादिति चेत् स्वपक्षेऽपि कथं सा विंशतिदिवसैर्न्यूनत्वादिति सन्तोष्टव्यम । तस्मात् ईषद्वैषम्यमविवक्षितमिति सुष्ठूक्तं प्रथमदिवसे इति ॥ २ ॥

तस्येति । राजानो यक्षाः (राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोरिति विश्वः ।) राज्ञां राजा राजराजः कुबेरः (राजराजो धनाधिप इत्यमरः । राजाहः सखिभ्यष्टच इति टच्प्रत्ययः । (तस्य अनुचरो यक्षः अन्तर्बाष्पो धीरोदात्तत्वात् अन्तः स्तम्भिताश्रुः सन् कौतुकाधानहेतोः अभिलाषोत्पादकारणस्य (कौतुकञ्चाभिलाषे स्यादुत्सवे नर्महर्षयोरिति विश्वः ।)तस्य मेघस्यार्थे कथमपि गरीयसा प्रयत्नेनेत्यर्थः । ज्ञानहेतुविवक्षायामप्यादि कथमव्ययम् ।
(कथमादि तथायत्नं तत्सौरभ्यमनोहरं [illegible]) स्थित्वा

CC-0 Pt. Chakradhar Joshi and Sons Collection. Digitized by eGangotri

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥४॥

चिरं दध्यौ चिन्तयामास (ध्यै चिन्तायामितिधातोर्लिट्।) मनोविकारोपशमनपर्य्यन्तमिति शेषः। विकारहेतुमाह मेघालोके इति मेघालोके मेघदर्शने सति सुखिनोऽपि प्रियादिजनसङ्गतस्यापि चेतः चित्तम् अन्यथाभूता वृत्तिर्व्यापारो यस्य तत् अन्यथावृत्ति भवति विकृतिमापद्यत इत्यर्थः। कण्ठाश्लेषप्रणयिनि कण्ठालिङ्गनार्थिनि जने दूरे संस्था स्थितिर्यस्य तस्मिन् दूरसंस्थे सति किं पुनः विरहिणः किमुत वक्तव्यमित्यर्थः। विरहिणां मेघसन्दर्शनमुद्दीपनं भवतीति भावः। अर्थान्तरन्यासोऽलङ्कारः तदुक्तं दण्डिना ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन। तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुन इति ॥ २ ॥

अथ समाहितान्तःकरणः सन् किं कृतवानित्याह प्रत्यासन्ने इति। स यक्षो यश्चिरं दध्यौ स इत्यर्थः नभसि श्रावणे (नभाः श्रावणिकश्च स इत्यमरः।) प्रत्यासन्ने आषाढस्य अनन्तरं सन्निकृष्टे प्राप्ते सतीत्यर्थः। दयिता जीवितालम्बनार्थी सन् वर्षाकालस्य विरहदुःखजनकत्वात् उत्पन्नानर्थप्रतीकारात् अनर्थोत्पत्तिप्रतिबन्ध एव वरमिति

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।

न्यायेन प्रागेव प्रियाप्राणधारणोपायं चिकीर्षुरित्यर्थः। जीवनस्य उदकस्य मूतः पटबन्धो जीमूतः (ष्टषोदरादित्वात् साधुरिति। मूतः स्यात् पटबन्धेऽपीति रुद्रः।) तेन जीमूतेन जलधरेण प्रयोज्येन स्वकुशलमयीं स्वक्षेमप्रधानां प्रवृत्तिं वार्त्ताम् (वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः।) हारयिष्यन् प्रापयिष्यन्। लृट् शेषे चेति चकारात् क्रियार्थक्रियोपपदात् लृट्प्रत्ययः। जीवनार्थं कर्म जीवनप्रदेनैव कर्त्तव्यमिति भावः (कृकोरन्यतरस्यामिति कर्मसंज्ञाया विकल्पात् पक्षे कर्त्तरि ष्ठतीता।) अति प्रत्यग्रैः नवैः कुटजकुसुमैर्गिरिमल्लिकाभिः (कुटजो गिरिमल्लिकेति हलायुधः।) कल्पितार्घाय कल्पितः अनुष्ठितः अर्घः पूजाविधिर्यस्य तस्मै (मूल्ये पूजाविधावर्घ इत्यमरः।) तस्मै जीमूताय। क्रियाग्रहणमपि कर्त्तव्यमिति (सम्प्रदानत्वाच्चतुर्थी।) प्रीतिप्रमुखानि प्रीतिपूर्वकाणि वचनानि यस्मिन् कर्मणि तत्प्रीतिप्रमुखवचनं यथा तथा शोभनम् आगतं स्वागतं वचनं स्वागत प्रीतः सन् व्याजहार कुशलागमनं पप्रच्छ इत्यर्थः। नाथेन तु अत्र प्रत्यासन्ने मनसीति साधीयान् पाठः कल्पितः प्रत्यासन्ने प्रकृतिमापन्ने सतीत्यर्थः॥ ४॥

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥५॥
जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।

ननु चेतनसाध्यमर्थं कथमचेतनेन कारयितुं प्रवृत्त इत्यपेक्षायां कविः समाधत्ते धूमेति। धूमश्च ज्योतिश्च सलिलञ्च मरुत् वायुश्चैषां सन्निपातः सङ्घातो मेघः क अचेतनत्वात्सन्देशानर्हः इत्यर्थः। पटुकरणैः समर्थैरिन्द्रियैः (करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः।)प्राणिभिश्चेतनैः (प्राणो तु चेतनो जन्मौत्यमरः।) प्रापणीयाः प्रापयितव्याः सन्दिश्यन्ते इति सन्देशाः ते एव अर्थाः क इत्येवम् औत्सुक्यात् इष्टार्थोद्युक्तत्वात्। (इष्टार्थोद्युक्त उत्सुक इत्यमरः।) अपरिगणयन् अविचारयन् गुह्यको यक्षः तं मेघं ययाचे याचितवान् तथाहि कामार्त्ताः मदनातुराः चेतनाश्च अचेतनाश्च तेषु विषये प्रकृतिकृपणाः स्वभावदीनाः कामान्धानां युक्तायुक्तविवेकशून्यत्वात् अचेतनयाञ्ञा न विरुध्यते इत्यर्थः। अत्र मेघसन्देशयोर्विरूपयोर्घटनात् विषमालङ्कारः तदुक्तं विरूपकार्य्योत्पत्तिर्यत्रानर्थस्य वा भवेत्। विरूपघटना चासौ विषमालङ्कृतिर्मिथेति। सा च अर्थान्तरन्यासानुप्राणिता तत्समर्थकत्वेनैव चतुर्थपादे तस्योपन्यासात् ॥ ५ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ॥६॥

सम्प्रति याञ्चाप्रकारमाह ज्ञातमिति। हे मेघ त्वां भुवनेषु विदिते भुवनविदिते (निष्ठेति भूतार्थे क्तः गति-बुद्धीत्यादिना वर्त्तमानार्थत्वेऽपि क्तस्य च वर्त्तमाने इति भुवनशब्दस्य षष्ठ्यन्तता नियमात् समासो न स्यात् क्तेन च पूजायामिति निषेधात्) पुष्कराश्च आवर्त्तकाश्च केचित् मेघानां श्रेष्ठाः तेषां वंशे जातं महाकुलप्रसूतमित्यर्थः। कामरूपम् इच्छाधीनविग्रहं दुर्गादिसञ्चारक्षममित्यर्थः। मघोनः इन्द्रस्य प्रकृतिपुरुषं प्रधानपुरुषं जानामि तेन तत्-प्रभुत्वादि जानामीत्यादिगुणयोगित्वेन हेतुना विधि-वशात् दैवायत्तत्वात् (विधिर्विधाने दैवे चेत्यमरः। वशमायत्ते वशमिच्छाप्रभेदयोरिति विश्वः।) दूरे बन्धु-र्यस्य स दूरबन्धुः वियुक्तभार्य्योऽहं त्वयि अर्थित्वं गतः। ननु याचकस्य याञ्चायां याच्यगुणोत्कर्षः कुत्र उपयुज्यते इत्याशङ्क्य दैवात् याञ्चाभङ्गेऽपि लाघवदोषाभाव एव उपयोग इत्याह याञ्चेति। अधिगुणे अधिकगुणे पुंसि विषये याञ्चा मोघा निष्फलापि वरम् ईप्सितत्वं दातृ-गुणाढ्यत्वात् प्रियत्वं याञ्चावैफल्यात् ईषत् प्रियत्वमिति भावः अधमे निर्गुणे याञ्चा लब्धकामापि सफलापि न वरम् ईप्सितमपि न भवतीत्यर्थः (देवात् हृते वरः श्रेष्ठे

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

सन्तप्तानां त्वमसि शरणं तत् पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥७॥

त्रिषु क्लीवे मनाक्प्रिये इत्यमरः।) अर्थान्तरन्यासनुप्राणितः प्रेयोऽलङ्कारः तदुक्तं दण्डिना प्रेयः प्रियतराख्यानमिति। एतत् आद्ये पादत्रये चतुर्थपादस्थेन अर्थान्तरन्यासेन उपजीवितमिति सुव्यक्तमेतत्॥ ६॥

सन्तप्तानामिति। हे पयोद त्वं सन्तप्तानाम् आतपेन वा प्रवासविरहेण वा सञ्जरितानाम् (सन्तापः संज्वरः समावित्यमरः।) शरणं पयोदानेन आतपखिन्नानां प्रोषितानां स्वस्थानप्रेरणया च रक्षकोऽसि (शरणं गृहरक्षित्रोरित्यमरः।) तत तस्मात् कारणात् धनपतेः कुबेरस्य क्रोधेन विश्लेषितस्य प्रियया वियोजितस्य मे मम सन्देशं वार्त्तां प्रियायाः हर प्रियां प्रति नय इत्यर्थः। (सम्बन्धसामान्ये षष्ठी।) सन्देशहरणेन आवयोः सन्तापं नुद इत्यर्थः। कुत्र स्थाने सा स्थिता तत्स्थानस्य वा किं व्यावर्त्तकं तत्राह गन्तव्येति वहिर्भवं वाह्यम्। (वहिर्देवपञ्चजनेभ्यश्चेत्यण्।) वाह्ये उद्याने स्थितस्य हरस्य शिरसि या चन्द्रिका तया धौतानि निर्मलानि हर्म्याणि धनिकभवनानि यस्यां सा तथोक्ता (हर्म्यादि धनिनां वास इत्य-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥८॥
मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः।

मरः।) अनेन व्यावर्त्तकत्वमुक्तम्। अलका नाम अलका इति प्रसिद्धा यक्षेश्वराणां वसति स्थानं ते तव गन्तव्या त्वया गन्तव्याऽत्यर्थः (कृत्यानां कर्त्तरि वेति षष्ठी)॥ ७॥

मदर्थं प्रस्थितस्य ते पथिकाङ्गनाजनाश्वासनम् आनुषङ्गिकं फलम इत्याह त्वामिति। पवनपदवीम आकाशम् आरूढं त्वां पन्थानं गच्छन्ति ते पथिकाः (पथः ष्कन्निति ष्कन्प्रत्ययः।) तेषां वनिताः प्रोषितभर्तृकाः प्रत्ययात् प्रियागमनविश्वासात् (प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुश्चित्यमरः।) आश्वसत्यो विश्वसिताः (श्वसिधातोः शतरि उगितश्चेति ङीप्) तथा उद्गृहीतालकान्ताः दृष्टिप्रसारार्थम उन्नमय्य धृतालकायाः सत्यः प्रेक्षिष्यन्ते अत्युत्कण्ठतया द्रक्ष्यन्तीत्यर्थः। तथाहि त्वयि सवर्षे व्याप्ते सति विरहेण विधुरां विवशां जायां कः उपेक्षेत न कोऽपि स्वार्थः अन्योऽपि महातिरिक्तोऽपि यो जनः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥८॥

अहमिव पराधीनवृत्तिः परावत्तजीवको न स्यात् स्वतन्त्रस्तु न कोऽपि उपेक्षेत इति भावः। अर्थान्तरन्यासः॥८॥

निमित्तान्यपि ते शुभानि द्रक्ष्यन्ते इत्याह मन्दं मन्दमिति। अनुकूलः पवनो वायुः त्वां मन्दं मन्दम् अतिमन्दम् इत्यर्थः (अत्र कथञ्चित् वीप्सायामेव द्विरुक्तिर्निर्वाह्या प्रकारे गुणवचनस्य इत्येतदाश्रयणे तु कर्मधारयवद्भावे सुब्लुकि मन्दमन्दमिति स्यात् तदेवाह वामनः मन्दं मन्दमित्यतिप्रकारार्थे द्विर्भाव इति।) यथा सदृशं भाविफलानुरूपम् इत्यर्थः (यथा सादृश्यवीप्साऽर्थानतिक्रमे इति यादवः।) नुदति प्रेरयति अयं सगन्धः सगर्वः सबन्धो इति कैचित् (गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वः।) ते तव वामा वामभागस्थः (वामस्तु वक्रे रम्ये स्यात् सव्ये वामगतेऽपि चेति शब्दार्णवे।) चातकः पक्षि विशेषश्च मधुरं श्राव्यं नदति व्याहरति इष्टं निमित्तद्वयं वर्त्तते वर्त्तिष्यते च अपरं निमित्तमित्याह। गर्भेति गर्भः कुक्षिस्थो जन्तुः (गर्भोऽण्डारके ह्यग्नौ सुते पनसकण्टके। कुक्षौ कुक्षिस्थजन्तौ चेति यादवः।) तस्य आधानम् उत्पादनं तदेव क्षण उत्सवः सुखहेतुत्वात् इति भावः (निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण इत्यमरः।) तस्मिन् परिचयात् अभ्यासात् हेतोः खे

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ताञ्चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि॥१०॥

व्योम्नि आबद्धमालाः गर्भाधानसुखार्थं त्वत्समीपे बद्धपङ्क्तयः इत्यर्थः (उक्तञ्च कर्णोदये गर्भं बलाका दधतेऽभ्रयोगान्नाके निबद्धावलयः समन्तादिति ।) बलाकाः बकाङ्गनाः नयनसुभगं दृष्टिप्रियं भवन्तं नूनं सत्यं सेविष्यन्ते । अनुकूलमारुतचातकशब्दितबलाकादर्शनानां शुभसूचकत्वं शकुनशास्त्रे दृष्टं तत् विस्तरभयात् न अलेखि ॥ ९ ॥

नच तस्या नाशात् व्रतस्खलनाद्वा निरर्थकस्त्वत्प्रयास इत्याह तामिति । हे मेघ दिवसानाम् अवशिष्टदिनानां गणनायां संख्याने तत्पराम् आसक्ताम् (तत्परे प्रसितासक्तावित्यमरः ।) अतएव अव्यापन्नाम् अमृतां शापावसाने मदागमनप्रत्याशया जीवन्तीम् इत्यर्थः एकः पतिर्यस्याः सा एक पत्नी तां पतिव्रताम् इत्यर्थः (नित्यं सपत्न्यादिष्विति ङीप् नकारश्च ।) भ्रातुः मे जायां भ्रातृजायां भ्रातृवत् निःशङ्कं दर्शनीयाम् इत्याशयः तां मत्प्रियाम् अविहतगतिः अविच्छिन्नगतिः सन् अवश्यं द्रक्ष्यसि च आलोकविषये च । तथाहि आशा अतितृष्णा (आशा दिगतितृष्णयोरिति यादवः ।) बध्यतेऽनेन इति बन्धः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद्विसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः॥११॥

वन्धनं हन्तम् इति यावत् आशा एव बन्धः आशाबन्धः कर्त्तारं प्रणयि प्रेमयुक्तम् अतएव कुसुमसदृशं सुकुमारम् इत्यर्थः। अतएव विप्रयोगे विरहे सद्यःपाति सद्योभ्रंशनशीलम् अङ्गनानां हृदयं जीवितम् (हृदयं जीविते चित्ते इति शब्दार्णवे।) प्रायशः प्रायेण रुणद्धि प्रतिबध्नाति। अर्थान्तरन्यासः ॥ १० ॥

सम्प्रति सहायसम्पत्तिश्चास्ति इत्याह कर्त्तुमिति। यत् गर्जितं कर्त्तुं महीम् उच्छिलीन्ध्राम् उद्भूतकन्दलिकाम् (कन्दल्याञ्च शिलीन्ध्रा स्यादिति शब्दार्णवेः।) अतएव अवन्ध्यां सफलां कर्त्तुं प्रभवति शक्नोति शिलीन्ध्राणां भाविशस्यसम्पत्तिसूचकत्वात् इति भावः। (तदुक्तं निमित्तनिदानं कालाभ्रयोगादुदिताः शिलीन्ध्राः सम्पन्नशस्यां कथयन्ति धात्रीमिति।) तत् श्रवणसुभगं श्रोत्रसुखं लोकस्य इति शेषः ते तव गर्जितं श्रुत्वा मानसोत्काः मानसे सरसि उत्कनसः उत्सुका इति यावत् (उत्क उत्कना इति निपातात्साधु।) कालान्तरे मानसस्य हिमदुष्टत्वात् हिमस्य च हंसानां रोगहेतुत्वात् अन्यत्र

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥१२॥

गता हंसाः पुनर्वर्षासु मानसम् एव गच्छन्ति इति प्रसिद्धिः विसकिसलयानां मृणालाग्राणां छेदैः शकलैः पाथेयवन्तः पथि साधु पाथेयं पथि भोज्यम् (पथ्यतिथिवसतिस्वपतेर्ढञ् ।) तद्वन्तः मृणालाग्रशकलसम्बलवन्तः इत्यर्थः राजहंसाः हंसविशेषाः (राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिता इत्यमरः ।) नभसि व्योम्नि भवतः तव आ कैलासात् कैलासपर्यन्तं पदद्वयञ्चैतत् सहायाः सयात्राः (सहायस्तु सयात्रः स्यादिति शब्दार्णवेः ।) सम्पत्स्यन्ते भविष्यन्ति ॥ ११ ॥

आपृच्छस्वेति । प्रियं सखायं प्रियसखम् (राजाहः सखिभ्यष्टजिति समासान्तः ।) तुङ्गम् उन्नतं पुंसां वन्द्यैः सुराराधनीयैः रघुपतिपदैः रामपादन्यासैः मेखलासु कटकेषु (अथ मेखला । श्रोणिस्थानेऽद्रिकटके कटिबन्धेभवन्धने इति यादवः ।) अङ्कितं चिह्नितम् इत्थं सखित्वात् महत्त्वात् पवित्रत्वाच्च सम्भावनार्हम् अमुं शैलं चित्रकूटाद्रिम् आलिङ्ग्य आपृच्छस्व साधो यामि इति आमन्त्रणेन समाजय (आमन्त्रणसमाजने । आप्रच्छन-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयःस्रोतसां चोपयुज्य॥१३॥

मित्यमरः। आङि नु प्रच्छोरित्यात्मनेपदम्।) सखित्वं निर्वाहयति काले इति काले कालेप्रतिप्रावृट्कालं सुहृत्-समागमनकालश्च कालशब्देन उच्यते(वीप्सायां द्विरुक्तिः।) भवतः संयोगं सम्पर्कम् एत्य चिरविरहजम् उष्णं बाष्पम् उष्माणं नेत्रजलञ्च (बाष्पो नेत्रजलोष्मणोरिति विश्वः) मुञ्चतो यस्य शैलस्य स्नेहव्यक्तिः प्रेमाविर्भावो भवति। स्निग्धानां हि चिरविरहसङ्गतानां बाष्पपातो भवति इति भावः॥ १२॥

सम्प्रति तस्य मार्गं कथयति मार्गमिति। हे जलद तावत् इदानीं कथयतो मत्तः इतिशेषः। त्वत्प्रयाणस्य अनुरूपम् अनुकूलं मार्गम् अध्वानम् (मार्गो मृगपदे मासि सौम्यर्क्षेऽन्वेषणेऽध्वनीति यादवः।) शृणु तदनु मार्ग-श्रवणानन्तरं श्रोत्राभ्यां पेयं पानार्हम् अतितृष्णया श्रोत-व्यम् इत्यर्थः पेयग्रहणात् सन्देशस्य अमृतसाम्यं गम्यते मे सन्देशं वाचिकम् (सन्देशवाक् वाचिकं स्यादित्यमरः।) श्रोष्यसि यत्र मार्गे खिन्नः खिन्नः अभीक्ष्णं क्षीणबलः सन् (नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः।) शिखरिषु पर्ववेषु

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।

पदं न्यस्य निक्षिप्य पुनर्बललाभार्थं क्वचित् विश्रम्येत्यर्थः क्षीणः क्षीणः अभीक्ष्णं कृशाङ्गः सन्(अत्रापि कृदन्तत्वात्पूर्ववत् द्विरुक्तिः।) स्रोतसां परिलघु गुरुत्वदोषरहितम् उपलास्खालनखेदितत्वात् पथ्यम् इत्यर्थः (तथा च वाग्भटः उपलास्खालनक्षेपविच्छेदैः खेदितोदकाः। हिमवन्मलयोद्भूताः पथ्या नद्यो भवन्त्यमूरिति।) पयः पानीयम् उपयुज्य शरीरपोषणार्थम् अभ्यवहृत्य च गन्तासि गमिष्यसि (गमेर्लुट्) ॥ १२ ॥

अद्रेरिति। पवनो वायुः अद्रेः चित्रकूटस्य शृङ्गं हरति किंस्वित्। किंस्विच्छब्दो वितर्कार्थे चादिषु पठितः। इति शङ्कया उन्मुखीभिः उन्नतमुखीभिः (स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति ङीप्।) मुग्धाभिः मूढाभिः (मुग्धः सुन्दरमूढयोरित्यमरः।) सिद्धानां देवयोनिविशेषाणाम् अङ्गनाभिः चकितचकितं चकितप्रकारं यथा तथा (प्रकारे गुणवचनस्येति द्विर्भावः।) दृष्टोत्साहः दृष्टोद्योगः सन् सरसाः आर्द्राः निचुलाः स्थलवेतसाः यस्मिन् तस्मात् (वानीरे कविभेदे स्यान्निचुलः स्थलवेतसे इति शब्दार्णवे।) अस्मात् स्थानात् आश्रमात् पथि नभोमार्गे दिङ्नागानां दिग्गजानां स्थलाः ये हस्ताः कराः तेषाम् अवलेपान् आचेयान् परिहरन् (हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपीति

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्१४
रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।

विश्वः ।) उदङ्मुखः सन् अलकायाः उदीच्यत्वात् इत्याशयः खम् आकाशम् उत्पत उच्चैर्भव । अत्र इदमपि अर्थान्तरं ध्वनयति रसिको निचुलो नाम महाकविः कालिदासस्य सहाध्यायः परापादितानां कालिदासप्रबन्धदूषणानां परिहर्त्ता यस्मिन् स्थाने तस्मात् स्थानात् उदङ्मुखो निर्दोषत्वात् उन्नतमुखः सन् पथि सारस्वतमार्गे दिङ्नागानां पूज्यायां बहुवचनम् दिङ्नागाचार्यस्य कालिदासप्रतिपक्षस्य हस्तावलेपान् हस्तविन्यासपूर्वकाणि दूषणानि परिहरन् (अवलेपस्तु गर्वे स्यालेपने दूषणेऽपि चेति विश्वः ।) अद्रेः अद्रिकल्पस्य दिङ्नागाचार्यस्य शृङ्गं प्राधान्यम् (शृङ्गं प्राधान्यसान्वोश्चेत्यमरः ।) हरतीति हेतुना सिद्धैः सारस्वतसिद्धैः महाकविभिः अङ्गनाभिश्च दृष्टोत्साहः सन् खम् उत्पत उच्चैर्भव इति स्वप्रबन्धम् आत्मानं वा प्रति कवेरुक्तिरिति । संसर्गतो दोषगुणा भवन्तीत्येतन्मृषा येन जलाशयेऽपि । स्थित्वानुकूलं निचुलश्चलन्तमात्मानमारुक्षति सिन्धुवेगात् इत्येतत्श्लोकनिर्माणात् तस्य कवेर्निचुलसंज्ञेति ॥ १४ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ॥१५॥
त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।

रत्नेति। रत्नच्छायानां पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणम् इव प्रेक्ष्यं दर्शनीयम् आखण्डलस्य इन्द्रस्य एतत् धनुःखण्डम् एतदिति हस्तेन निर्देशः पुरस्तात् अग्रे वल्मीकाग्रात् वानलूरविवरात् (वामलूरश्च नाकुश्च वल्मोकं पुंनपुंसकमित्यमरः ।) प्रभवति आविर्भवति येन धनुःखण्डेन ते तव श्यामं वपुः स्फुरितरुचिना उज्ज्वल कान्तिना बर्हेण पिच्छेन (पिच्छबर्हे नपुंसके इत्यमरः ।) गोपवेशस्य विष्णोः गोपालस्य कृष्णस्य श्यामं वपुरिव अतितरां कान्तिं शोभान् आपत्स्यते प्राप्स्यति ॥ १५ ॥

त्वयीति । कृषेः हलकर्षणस्य फलं शस्यं त्वयि (अधिकरणविवक्षायां सप्तमी ।) आयत्तम् अधीनम् (अधीना निघ्न आयत्त इत्यमरः ।) इति हेतोः प्रीत्या स्निग्धैः अकृत्रिमप्रेमार्द्रैः इत्यर्थः भ्रूविलासानां भ्रूविकाराणाम् अनभिज्ञैः पामरत्वात् इति शेषः जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सादरं वीक्ष्यमाणः सन् मालं मालाख्यं क्षेत्रं शैलप्रायम् उन्नतं स्थलम् (मालमुन्नतभूतलमित्युत्पलः ।) सद्यः तत्कालमेव सीरैः हलैः उत्कर्ष-

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥१९॥
त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।

णेन कर्षणेन सुरभि घ्राणतर्पणं यथा तथा आरुह्य तत्र अभिहत्य इत्यर्थः (सुरभिर्घ्राणतर्पणं इत्यमरः।) किञ्चित् पश्चात् लघुगतिः तत्र निर्हेष्टत्वात् क्षिप्रगमनः सन् (लघु क्षिप्रमरं द्रुतमित्यमरः।) भूयः पुनरपि उत्तरेणैव उत्तरमार्गेणैव व्रज गच्छ। (प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया।) यथा कश्चित् बहुवल्लभः पतिः क्वचित् क्षेत्रे कलत्रे गूढंविहृत्य (क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोरिति विश्वः।) दाक्षिण्यभङ्गभयात् नीचमार्गेण निर्गत्य पुनः सर्वाध्यक्षं सञ्चरति तद्वत् इति ध्वनिः ॥ १९ ॥

त्वामिति। आम्राः चूताः कूटेषु शिखरेषु यस्य सः आम्रकूटो नाम सानुमान् पर्वतः (आम्रस्तु रसालोऽसाविति कूटोऽस्त्री शिखरं शृङ्गमिति च अमरः।) आसारो धाराबृष्टिः (धारासम्पात आसार इत्यमरः।) तेन प्रशमितो वनोपप्लवो दावाग्निर्येन तं कृतोपकारमित्यर्थः अध्वश्रमेण परिगतं व्याप्तं त्वां साधु सम्यक् मूर्ध्ना वक्ष्यति वोढा (वहेर्लृट्।) तथाहि क्षुद्रः क्षपणोऽपि (क्षुद्रो दरिद्रे क्षपणे नृशंसे इति यादवः।) संश्रयाय

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥१७॥
छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।

सश्रयणाय मित्रे सुहृदि (अथ मित्रं सखा सुहृदित्यमरः।) प्राप्ते आगते सति प्रथमसुकृतापेक्षया पूर्वोपकारपर्य्यालोचनया विमुखो न भवति यः तथा तेन प्रकारेण उच्चैः उन्नतः सः आम्रकूटः किं पुनः विमुखो न भवतीति किमु वक्तव्यम् इत्यर्थः। एतेन प्रथमावसथे सौख्यलाभात् ते कार्यसिद्धिरस्तीति सूचितम् तदुक्तं निमित्तनिदाने प्रथमावसथे यस्य सौख्यं तस्याखिलेऽध्वनि। शिवं भवति याचावामन्यथा त्वशुभं ध्रुवमिति॥ १७॥

छन्नेति। हे मेघ परिणतैः परिपक्वैः फलैः द्योतन्ते इति तथोक्तैः आषाढ़े वनचूताः फलन्ति पच्यन्ते च मेघवातेन इत्याशयः काननाम्रैः वनचूतैः छन्नोपान्तः आवृतपार्श्वः अचलः आम्रकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशवन्मच्छाये श्यामवर्णे इत्यर्थः (वेणी तु केशवन्धे जलसुतायामिति यादवः।) त्वयि शिखरं शृङ्गम् आरूढे सति (यस्य च भावेन भावलक्षणमिति सप्तमी।) मध्ये श्यामः शेषे मध्यात् अन्यत्र विस्तारे परितः पाण्डुः हरिणः (हरिणः पाण्डुरः पाण्डुरित्यमरः।) भुवः स्तनः इव

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥१८॥
अध्वक्लान्तं प्रतिसुखगतं सानुकांश्चित्रकूट-
स्तुङ्गेन त्वां जलदशिरसा वक्ष्यति श्लाघमानः।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सद्भावार्द्रैः फलति नचिरेणोपकारो महत्सु॥ ०॥
स्खित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः।

अमरमिथुनानां खेचराणाम् इति भावः प्रेक्षणीयां दर्शनीयाम् अवस्थां नूनं यास्यति। मिथुनग्रहणं कामिनामेव स्तनत्वेन उत्प्रेक्षा सम्भवतीति कृतम्। यथा परिश्रान्तः कश्चित् कामी कामिनीनां कुचकलशे विश्रान्तः सन् स्वपिति तद्वत् भवानपि भुवो नायिकायाः स्तन इति ध्वनिः॥ १८॥

स्खित्वेति। हे मेघ वने चरन्ति इति वनचराः (तत्पुरुषे कृति बहुलमिति बहुलग्रहणाद्भुग् भवति।) तेषां वधूभिः भुक्ताः कुञ्जाः लताग्रहाः यत्र तस्मिन् (निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे इत्यमरः।) तत्र ते नयनविनोदोऽस्ति इत्यर्थः तस्मिन् आम्रकूटे मुहूर्तम् अल्पकालं न तु चिरं स्वकार्यविरोधात् इति भावः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

रेवां द्रक्षस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१९॥
तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।

(मुहूर्त्तमल्पकाले स्य दृष्टिक्षाद्वितयेऽपि चेति शब्दार्णवे ।) स्थित्वा विश्रम्य तोयोत्सर्गेण त्वामासारेत्युक्तवर्षणेन द्रुततरगतिः लाघवात् हेतोः अतित्वरितप्रगमनः सन् तस्मात् आम्रकूटात् परम् अनन्तरं तत्परं वर्त्म मार्गं तीर्णः अतिक्रान्तः उपलैः पाषाणैः विषमे विन्ध्यस्य अद्रेः पादे प्रत्यन्तपर्वते (पादाः प्रत्यन्तपर्वता इत्यमरः ।) विशीर्णां समन्ततो विस्मराम् एतेन कस्याश्चित् कामुक्याः प्रियतमचरणपातोऽपि ध्वन्यते रेवां नर्म्मदाम् (रेवा तु नर्म्मदा सोमोद्भवा मेखलकन्यकेत्यमरः ।) गजस्य अङ्गे शरीरे भक्तयो रचनाः रेखाः इति यावत् (भक्तिर्निषेवणे भागे रचनायामिति शब्दार्णवे ।) तासां छेदैः भङ्गिभिः विरचितां भूतिं शृङ्गारमिव भसितमिव वा (भूतिर्भातङ्गशृङ्गारे जातौ भस्मनि सम्पदीति विश्वः ।)द्रक्ष्यसि अयमपि महांस्ते नयनकौतुकलाभ इति भावः ॥ १९ ॥

तस्या इति । हे मेघ वान्तवृष्टिः उद्गीर्णवर्षः सन् क्रतवमनश्च व्यज्यते तिक्तैः सुगन्धिभिः तिक्तरसवद्भिश्च (तिक्तो रसे सुगन्धौ चेति विश्वः ।) वनगजमदैः वासितं

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥२०॥
नीपं दृष्ट्वा हरितकपिशं केशरैरर्धरूढै-
रालिङ्गूतप्रथमसुकुलाः कन्दलीश्चानुकच्छम्।

सुरभितं भावितश्च हिमवद्दिव्यसलया गजानां प्रभवाः इति विख्यस्य गजप्रभवत्वात् इति भावः जम्बूकुञ्जैः प्रतिहतरयं प्रतिवनवेगं सुखपेयम् इत्यर्थः एतेन लघुत्वं कषायभावना च व्यज्यते तस्याः रेवायाः तोयम् आदाय गच्छेः व्रज। हे घन मेघ अन्तः सारो बलं यस्य तं त्वाम् अनिलः आकाशवायुः शरीरस्थश्च गम्यते तुलयितुं न शक्ष्यति शक्तो न भविष्यति तथाहि रिक्तः अन्तःसारशून्यः सर्वोऽपि लघुः भवति प्रकम्प्यो भवति इत्यर्थः पूर्णता सारवत्ता गौरवाय अप्रकम्प्यत्वाय भवति इत्यर्थः। अयमत्र ध्वनिः आदौ वमनयाधितस्य पुंसः पश्चात् श्लेष्मशोषणाय लघुतिक्तकषायापास्नुनात् लब्धबलस्य वातप्रकोपो न स्यादिति यथाह वाग्भटः कषायास्त्वार्द्रमारुतस्य विशदो रूक्षणो हिताः। किंतु तिक्ताः कषाया वा ये निसर्गात्कफापहाः। क्षतक्षीणः क्षमाप्रेतपेयादेः पथ्यभोजिनः। वातादिभिर्न बाधा स्यादिन्द्रियैरिव योगिन इति॥ २०॥

नीपमिति। सारङ्गाः मतङ्गजाः कुरङ्गाः वा (सारङ्गः स्यातके भृङ्गे कुरङ्गे च मतङ्गजे इति विश्वः।) अर्धरूढैः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम्॥२१॥
अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।

एकदेशोद्गतैः केशरैः किञ्जल्कैः हरितं पालाशवर्णम् (पालाशो हरितो हरिदित्यमरः ।) कपिशं श्यामवर्णम् (श्यावः स्यात्कपिश इत्यमरः ।) हरितं च तत् कपिशं च हरितकपिशम् (वर्णो वर्णेनेति समासः ।) नीपं स्थलकदम्बकुसुमम् (अथ स्थलकदम्बके । नीपः स्यादिति शब्दार्णवे ।) दृष्ट्वा संप्रेक्ष्य विदित्वा इति यावत् तथा कच्छेषु अनूपेषु अनुकच्छम् (अव्ययं विभक्तीत्यादिना विभक्त्यर्थेऽव्ययीभावः । जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध इत्यमरः ।) आविर्भूताः प्रथमाः प्रथमोत्पन्नाः सुकुलाः यासां ताः कन्दलीः भूमिकदलीः द्रोणपर्णी स्निग्धकन्दा कन्दली भूकदल्यपीति शब्दार्णवे ।) जग्ध्वा भक्षयित्वा (अदो जग्धिरिति जग्धादेशः ।) अरण्येषु अधिकसुरभिम् अतिघ्राणतर्पणम् (दग्धारण्येष्विति पाठे दग्धमित्यधिकविशेषणम् अर्थवशात् कन्दलीश्च दृष्ट्वा इत्यन्वयो द्रष्टव्यः ।) उर्व्याः भूमेः गन्धम् आघ्राय जललवमुचो मेघस्य ते तव मार्गं सूचयिष्यन्ति अनुमापयिष्यन्ति । यत्र यत्र वृष्टिकार्यं नीपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टम् इत्यनुमीयते इत्यर्थः ॥ २१ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि॥२२॥
उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।

अम्भ इति । प्रक्षिप्तमपि व्याख्यायते । अम्भो बिन्दूनां सर्वं वर्षोदबिन्दनां ग्रहणेसर्वं सहापतितमम्बु न चातकस्य हितमिति शास्त्रात् भूमृष्ठोदकस्य तेषां रोगहेतुत्वात् अन्तराले एव स्तोकारे चतुरांश्चातकान् वीक्षमाणाः कौतुकात् पश्यन्तः श्रेणीभूताः बलपङ्क्तीः । (अभूततद्भावे च्विः ।) बलाकाः बकपङ्क्तीः परिगणनया एका द्वे तिस्र इति संख्यानेन निर्दिशन्तो हस्तेन दर्शयन्तः सिद्धाः स्तनितसमये स्वगर्जितकाले सोत्कम्पानि उत्कम्पपूर्वकाणि प्रियसचरीणां सम्भ्रमेणालिङ्गितानि आसाद्य स्वयं ग्रहणार्थे वसुखमनुभूयेत्यर्थः । त्वां मानयिष्यन्ति स्वनिमित्तत्वात् सुखलाभस्येति भावः ॥ २२ ॥

उत्पश्यामीति । हे सखे मेघ मत्प्रियार्थं यथा तथा द्रुतं क्षिप्रम् (लघु क्षिप्रसरं द्रुतमित्यमरः ।) यियासोः यातुमिच्छोरपि (यातेः सन्नन्तादुप्रत्ययः ।) ते तव ककुभैः कुटजकुसुमैः सुरभौ सुगन्धिनि (ककुभः कुटजेऽर्जुने इति शब्दार्णवे ।) पर्वते पर्वते प्रतिपर्वतम् (वीप्सायां द्विरुक्तिः ।) कालक्षेपं कालविलम्बम् (क्षेपो विलम्बे

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्॥२३॥
पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।

निन्दायामिति विश्वः) उत्सृज्यामि उत्प्रेक्षे । विलम्ब-हेतुं दर्शयन् आशुगमनं प्रार्थयते शुक्लेति सजलानि सानन्दवाष्पाणि नयनानि येषां तैः शुक्लापाङ्गैः मयूरैः (मयूरो बर्हिणो बर्ही शुक्लापाङ्गः शिखाबल इति यादवः ।) केकाः स्ववाणीः (केका वाणी मयूरस्येत्यमरः । स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यातः प्रत्युद्गतः कृतातिथ्यः इत्यर्थः भवान् कथमपि यथाकथञ्चित् आशु गन्तुं व्यवस्येत् उद्युञ्जीत (प्रार्थने लिङ् । शेषे प्रथम इति प्रथमपुरुषः शेषश्चायं भवच्छब्दो युष्मदस्मच्छब्द-व्यतिरेकात् ।) स्वागतीकृत्य केकाः इत्यत्र केकासु आरोप्य-माणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात् परिणा-मालङ्कारः तदुक्तम् अलङ्कारसर्वस्वे आरोप्यमाणस्य प्रकृतो-पयोगित्वे परिणाम इति ॥ २३ ॥

पाण्डुच्छायेति । हे मेघ त्वयि आसन्ने सन्निकृष्टे सति दशार्णाः नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुला-येषु भिन्नैः विकसितैः (मुकुलाग्रेषु सूचिः स्यादिति शब्दार्णवे ।) केतकैः केतकीकुसुमैः पाण्डुच्छायाः हरि-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥२४॥
तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।

शवर्णाः उपवनानां इतयः कण्टकशाखावरणाः येषु ते तथोक्ताः (प्राकारो वरणः सालः प्राचीरं प्रान्ततो इतिरित्यमरः।) तथा गृहबलिभुजां काकादिग्रामपक्षिणां नीडारम्भैः कुलायनिर्माणैः (कुलायो नीड़मस्त्रियामित्यमरः।) चित्तायाः इमानि चैत्यानि रथ्याहृत्ताः (चैत्यमायतने बुद्धवन्ध्ये चोद्दे शपादपे इति विश्वः।) आकुलानि सङ्कीर्णानि ग्रामेषु चैत्यानि येषु ते तथोक्ताः तथा परिणतैः पक्वैः फलैः श्यामानि यानि जम्बूवनानि तैः अन्ताः रम्याः (समाववसिते रम्ये समाप्तावन्त इष्यते इति शब्दार्णवे।) तथा कतिपयेषु एव दिनेषु स्थायिनो हंसाः येषु ते तथोक्ताः एवंविधाः सम्पत्स्यन्ते भविष्यन्ति। (पीटायुवतिस्तोककतिपयेत्यादिना कतिपयशब्दस्योत्तरपदत्वेऽपि न तच्छब्दस्योत्तरत्वमस्ति अस्य शास्त्रस्य प्रायिकत्वात्॥ २४॥

तेषामिति। दिक्षु प्रथितं प्रसिद्धं विदिशा इति लक्षणं नामधेयं यस्याः ताम् (लक्षणं नास्ति चिह्ने चेति विश्वः।) तेषां दशार्णानां सम्बन्धिनीं धौयन्तेऽस्यामिति धानी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥२५॥
नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः।

(कालाधिकरणयोश्चेति ल्युट्।) राज्ञां धानी राजधानी (कृद्योगलक्षणा षष्ठी समस्यत इति वक्तव्यात् समासः।) तां प्रधाननगरीम् (प्रधाननगरी राज्ञां राजधानीति कथ्यते इति शब्दार्णवे।) गत्वा प्राप्य सद्यः कामुकत्वस्य विलासितायाः (विलासो कामुकः कामी स्त्रीपरो रतिलम्पट इति शब्दार्णवे) अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यते त्वया इति शेषः (कर्मणि लुट्।) कुतः यस्मात् कारणात् स्वादु मधुरं चलाः ऊर्मयो यस्य तत् चलोर्मि तरङ्गितं वेत्रवत्याः नाम नद्याः पयः सभ्रूभङ्गं भ्रूकुटियुक्तं दशनपीडया इति भावः मुखम् इव अधरम् इव इत्यर्थः तीरोपान्ते तटप्रान्ते यत् स्तनितं गर्जितं तेन सुभगं यथा तथा स्तनितशब्देन मण्डितमपि ध्वन्यते (ऊर्ध्वं सुचलितकण्ठनासिकं हुङ्कृतं स्तनितमल्पघोषवदिति लक्षणात्।) पास्यसि (पिबतेर्लुट्।) कामिनामधरास्वादः सुरतादतिरिच्यते इति भावः॥ २५॥

नीचैरिति। हे मेघ तत्र विदिशासमीपे विश्रामः विरामः तेन हेतुना (भावे घञ् प्रत्ययः।) तस्य हेतोः

CC-0. Pt. Shankar Lal Joshi and Sons Dev Prag. Digitized by eGangotri

यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥२६॥

विश्रामकारणात् विश्रामार्थम् इत्यर्थः (षष्ठी हेतुप्रयोगे इति षष्ठी । विश्रामेत्यत्र नोदात्तोपदेशस्य मान्तस्यानाचमेरिति पाणिनीये ह्रस्वप्रतिषेधेऽपि विश्रामो वेति चन्द्रव्याकरणे विकल्पेन ह्रस्वविधानाद्रूपसिद्धिः ।) प्रौढपुष्पैः प्रवृद्धकुसुमैः कदम्बैः नीपवृक्षैः त्वत्सम्पर्कात् तव सङ्गात् पुलकाः अस्य जाताः पुलकितमिव सञ्जातपुलकमिव स्थितम् (तारकादित्वादितच्प्रत्ययः ।) नीचैरिति आख्या यस्य तं नीचैराख्यं गिरिम् अधिवसेः गिरौ वसेः इत्यर्थः (उपान्वध्याङ् वस इति कर्मत्वम् ।) यो नीचैर्गिरिः पण्याः क्रेयाः स्त्रियः पण्यस्त्रियः वेश्याः (वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीविनीति शब्दार्णवे ।) तासां रतिषु यः परिमलो गन्धविशेषः (विमर्दोत्थे परिमलो गन्धे जनमनोहरे इत्यमरः ।) तम् उद्गिरन्ति आविर्भावयन्ति इति तथोक्तानि तैः शिलावेश्मभिः कन्दरैः नागराणां पौराणाम् उद्दामानि उत्कटानि यौवनानि प्रथयति प्रकटयति । उत्कटयौवनाः क्वचित् अनुरक्ताः वाराङ्गनाः विश्रम्भविहाराकाङ्क्षिणो मातादिभयात् निशीथसमये कञ्चन विविक्तं देशम् आश्रित्य रमयन्ति तत्रैव बहुलमस्तीति प्रसिद्धिः । अत्र उद्गारशब्दो गौणार्थत्वात् न क्षुण्णावद्यः प्रत्युतकाव्यस्य अतिशोभाकर एव तदुक्तं दण्डिना

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्रान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम्॥३७

निष्ठ्यूतोक्षीर्णवाल्मादि गौरवहत्तिव्यपाश्रयम्। अतिसुन्दर-मन्यत्र ग्राम्यकक्षां विगाहते इति ॥ २६ ॥

विश्रान्त इति । विश्रान्तः सन् तत्र नीचैर्गिरौ विनो-ताध्वश्रमः सन् अथ विश्रान्तेरनन्तरं वने अरण्ये याः नद्यः तासां तीरेषु जातानि स्वयं रूढानि अकृत्रिमाणि इत्यर्थः (नदनदीति पाठे पुमान् स्त्रियेत्येकशेषो दुर्वारः ।) उद्यानानाम् आरामाणां सम्बन्धीनि यूथिकाजालकानि मागधीकुसुममुकुलानि (अथ मागधी गणिका यूथिकेत्य-मरः । कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानीति हलायुधः ।) नवजलकणैः सिञ्चन् आर्द्रीं कुर्वन् (अत्र सिञ्चतेरार्द्रीकरणार्थत्वात् द्रवद्रव्यस्य करणत्वं यत्र तु चर-णम् अर्थः तत्र द्रवद्रव्यस्य कर्मत्वम् यथा रेतः सिक्ता कुमा-रीषु सुखैर्निषिञ्चन्तमिवाहतं त्वचीत्येवमादि । एवं किरतीत्यादीनामपि रजः किरति मारुतः अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषित इत्यादिष्वर्थभेदाश्रयेण रजोलाजादीनां कर्मत्वकरणत्वे गमयितव्ये ।) तथा

गण्डयोः कपोलयोः स्वेदस्य श्रमजलस्य अपनयनेन प्रमार्जनेन वा

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दाम्नस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥२८

रुजा पीडा (भिदादित्वादङ्प्रत्ययः।) तया क्लान्तानि म्लानानि कर्णोत्पलानि येषां तेषां पुष्पाणि लुनन्तीति पुष्पलाव्यः पुष्पावचायिकाः स्त्रियः (कर्मण्यण्। टिड्ढाणञित्यादिना ङीप्।) तासां सुखानि तेषां छायायाः आतपस्य दानात् कान्तिदानस्य ध्वन्यते (छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातप इत्यमरः।) कामुकदर्शनात् कामिनीनां मुखविकाशो भवति इति भावः क्षणं परिचितः क्षणं संसृष्टः सन् न तु चिरं व्रज गच्छ॥२७॥

वक्र इति। उत्तराशाम् उदीचीं दिशं प्रति प्रस्थितस्य भवतः पन्थाः उज्जयिनीमार्गः वक्रो यद्यपि दूरो यद्यपि इत्यर्थः (विन्ध्यात् उत्तरवाहिन्याः निर्विन्ध्यायाः प्रागभागे कियत्यपि दूरे स्थिता उज्जयिनी उत्तरपथेषु निर्विन्ध्यायाः प्रश्चिमे इति वक्रत्वम्) तथापि उज्जयिन्याः विशालानगरस्य (विशालोज्जयिनी समेलुत्पलः।) सौधानाम् उत्सङ्गेषु उपरिभागेषु प्रणयः परिचयः (प्रणयः स्यात् परिचये याच्ञायां सौहृदेऽपि चेति यादवः।) तस्य

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः।

विमुखः पराङ्मुखो माऽभूः न भव इत्यर्थः (लोत्तरे लङ्चेति चकारादाशीरर्थे लुङ्। न माङ्योगे इत्यडागमप्रतिषेधः।) तत्र उज्जयिन्यां विद्युद्दाम्नां विद्युल्लतानां स्फुरितेभ्यः स्फुरणेभ्यः चकितैः भीतैः लोलापाङ्गैः चञ्चलकटाक्षैः पौराङ्गनानां लोचनैः न रमसे यदि तर्हि त्वं वञ्चितः प्रतारितः असि जन्मवैफल्यं भवेत् इत्यर्थः ॥२८॥

सम्प्रत्युज्जयिनीं गच्छतस्तस्य मध्ये मार्गं निर्विन्ध्यासम्बन्धमाह वीचीति। हे सखे पथि उज्जयिनीपथे वीचिक्षोभेण तरङ्गचलनेन स्तनितानां मुखराणाम् (कर्त्तरि क्तः।) विहगानां हंसानां श्रेणिः पङ्क्तिरेव काञ्चीगुणो यस्याः तस्याः स्खलितेन उपलस्खलनेन मदस्खलितेन च सुभगं यथा तथा संसर्पन्त्याः प्रवहन्त्याः गच्छन्त्याश्च तथा दर्शिता प्रकटिता आवर्त्तः अम्भसां भ्रम एव नाभिर्यया (स्यादावर्त्तोऽम्भसां भ्रम इत्यमरः।) निष्क्रान्ता विन्ध्यात् निर्विन्ध्या नाम नदी (निरादयः क्रान्ताद्यर्थं पञ्चम्येति समासः। द्विगुप्राप्तापन्नेत्यादिना परवल्लिङ्गताप्रतिषेधः।) तस्याः नद्याः सन्निपत्य सङ्गत्य रसो जलम् अभ्यन्तरे यस्य सः अन्यत्र रसेन शृङ्गारेण अभ्यन्तरः अन्तरङ्गो भव सर्वथा तस्याः रसम् अनुभव

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥२९॥
वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।

इत्यर्थः (शृङ्गारादौ जले वीर्ये सुवर्णे विषशुक्रयोः। तिक्तादावमृते चैव निर्व्यासे पारदे ध्वनौ। आस्वादे च रसं प्राहुरिति शब्दार्णवे।) ननु तत्प्राप्तेनामन्तरेण कथं तत्रानुभवो युज्यते इत्यत आह स्त्रीणामिति स्त्रीणां प्रियेषु विभ्रमो विलास एव आद्यं प्रणयवचनं प्रार्थनावाक्यं हि स्त्रीणामेष स्वभावो यत् विलासैरेव रागप्रकाशनं ननु कण्ठत इति विभ्रमग्रहात् नाभिसन्दर्शनादिः उक्त एव॥२९॥

निर्विन्ध्याया विरहावस्थां वर्णयन् तन्निराकरणं प्रार्थयते वेणीति। अवेणी वेणीभूतं वेण्याकारं प्रतनु स्तोकञ्च सलिलं यस्याः सा तथोक्ता वेणीभूतकेशपाशा इति च ध्वन्यते रुहन्ति इति रुहाः (इगुपधलक्षणः कः।) तटयोः रुहाः ये तरवः तेभ्यः भ्रश्यन्ति इति तथोक्तैः जीर्णपर्णैः शुष्कपत्रैः पाण्डुच्छाया पाण्डुवर्णा अतएव हे सुभग विरहावस्थया पूर्वोक्तप्रकारया करणेन अतीतस्य एतावन्तं कालम् अतीत्य गतस्य प्रोषितस्य इत्यर्थः ते नव सौभाग्यं सुभगत्वम् (हृङ्गमिसृस्रंसे पूर्वपदस्य चेलुभयपदहृहः।) व्यञ्जयन्ती प्रकाशयन्ती सा खलु सुभगो यम् अङ्गनाः काम-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सौभाग्यं ते सुभग विरहावस्था व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥३०॥
प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालम् ।

यन्ते इति भावः असौ पूर्वोक्ता सिन्धुः नदी निर्विन्ध्या (स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे इति वैजयन्ती ।) येन विधिना व्यापारेण कार्श्यं त्यजति सः विधिः त्वया एव उपपाद्यः कर्त्तव्यः इत्यर्थः स च विधिः एकत्र दृष्टिः अन्यत्र सम्भोगः तदभावनिबन्धनत्वात् कार्श्यस्य इति भावः । इयं पञ्चमी मदनावस्था तदुक्तं रतिरहस्ये नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः । उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युरिति । तामतीत्येति पाठमाश्रित्य सिन्धु नाम नद्यन्तरमिति व्याख्यानं तु सिन्धुर्नाम क्वचित् नदः काश्मीरदेशे स्थितः नदो तु कुत्रापि नास्तीत्युपेक्ष्यमित्याचक्षते ॥ ३० ॥

प्राप्येति । विदन्ति इति विदाः (इगुपधलक्षणः कः ।) आकरो वेदस्थानस्य विदाः कोविदाः (ओकारलोपः पृषोदरादित्वात् साधुः) उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणाद्यद्भूतोपाख्यानानां कोविदाः तत्रज्ञाः ग्रामेषु ये वृद्धाः ते सन्ति येषु तान् अवन्तीन्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

खल्वीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ॥३१
हारांस्तारांस्तरलगुटिकान् कोटिशः शङ्खशुक्तीः
शय्यश्यामान्मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणाञ्च भङ्गान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥०॥

तत्रामजनपदान् प्राप्य तत्र पूर्वोद्दिष्टां पूर्वोक्तां सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः इत्युक्तां श्रीविशालां सम्पत्तिसहतोम् । शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते इति शाश्वतः ।) विशालां पुरीम् उज्जयिनीम् अनुसर व्रज कथमिव स्थितां सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे खल्वीभूते अत्यल्पावशिष्टे सति इत्यर्थः गां भूमिं गतानाम् (गोरिला कुक्षिनो क्षमेत्यमरः ।) पुनरपि भूलोकगतानाम् इत्यर्थः स्वर्गिणां स्वर्गवतां जनानां शेषैः भुक्तशेषैः पुण्यैः सुकृतैः हृतम् आनीतम् स्वर्गार्थानुष्ठितकर्मशेषाणां स्वर्गदानावश्यम्भावात् इति भावः कान्तिरस्य अस्तीति कान्तिमत् उज्ज्वलं सारभूतम् इत्यर्थः एवं भुक्तात् अन्यत् (एके सुख्यन्यकेवला इत्यमरः ।) दिवः स्वर्गस्य खण्डमिव स्थिताम् इत्युत्प्रेक्षा । एतेन अतिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वम् उज्जयिन्या व्यज्यते ॥ ३१ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥०॥
पत्रश्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यः प्रतिदशसुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचरश्चन्द्रहासव्रणाङ्कैः ॥० ॥
दीर्घीं कुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।

दीर्घीकुर्वन्निति । यत्र विशालायां प्रत्यूषेषु अहर्मुखेषु (प्रत्यूषोऽहर्मुखं कल्यमित्यमरः ।) पटु प्रस्फुटं मदकलं मदेन अव्यक्तमधुरम (ध्वनौ तु मधुरास्फुटे कल इत्यमरः ।) सारसानां पक्षिविशेषाणाम् (सारसौ मैथुनौ कामौ गोनर्दः पुष्करालय इति यादवः ।) यद्वा सारसानां हंसानाम् । (चक्राङ्गः सारसो हंस इति शब्दार्णवे ।) कूजितं रुतं दीर्घीं कुर्वन् सन्तानयन् इत्यर्थः यावदातं शब्दानुवृत्तेरिति भावः । एतेन प्रियतमः स्वचाटुवाक्यानुसारि क्रीडापक्षिकूजितम् अवच्छिन्नीकुर्वन् इति च गम्यते स्फुटितानां विकसितानां कमलानाम् आमोदेन परिमलेन सह या मैत्री संसर्गः तेन कषायः सुरभिः (रागद्रव्ये कषायोऽस्त्री

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥३२॥
जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः।

निर्यासे सौरभे रसे इति यादवः।) अन्यत्र विमर्दगन्धौ इत्यर्थः (विमर्दोत्थे परिमलो गन्धे जनमनोहरे। आमोदः सोऽतिनिर्हारीत्यमरः।) अङ्गानुकूलो मान्द्यात् सुखस्पर्शः अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहनः इत्यर्थः (भवभूतिना च उक्तम् अशिथिलपरिरम्भैर्दत्तसंवाहनानीति। संवाह्यन्ते च सुरतश्रान्ताः प्रियैर्युवतयः एतत् कविरेव वक्ष्यति सम्भोगान्ते मम समुचितो हस्तसंवाहनानामिति।) शिप्रा नाम काचित् तत्रत्या नदी तस्याः वातः शिप्रावातः शिप्राग्रहणं शैत्यद्योतनार्थं प्रार्थना सुरतस्य याञ्ञा तत्र चाटूनि करोतीति तथोक्तः पुनः सुरतार्थं प्रियवचनप्रयोक्ता इत्यर्थः। (कर्मण्यण् प्रत्ययः।) प्रियतमः वल्लभः इव स्त्रीणां सुरतग्लानिं सम्भोगखेदं हरति नुदति चाटूक्तिभिर्विस्मृत-पूर्वखेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्ति इति भावः। प्रार्थनाचाटुकार इत्यत्र खण्डितनायिका अनुनीतेति व्याख्याने सुरतग्लानिहरणं न सम्भवति तस्याः पूर्वं सुरताभावात् पश्चात्तनसुरतग्लानिहरणं तु नेदानीन्तनको-पप्रशमनार्थचाटुवचनसाध्यमित्युपेक्षैवोचिता विवेकिनाम्। आतेः त्यासङ्गविक्लवे खण्डितेर्ष्याकषायितेति दशरूपके ॥३१॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

हर्म्येष्वस्या: कुसुमसुरभिष्वध्वखेदं नयेथा
लक्ष्मीं पश्यन् ललितवनितापादरागाङ्कितेषु ॥३२॥
भर्तु: कण्ठच्छविरिति गणै: सादरं वीक्ष्यमाण:
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य।

जालोद्गीर्णैरिति। जालोद्गीर्णै: गवाक्षमार्गनिर्गतै: (जालं गवाक्षे आनाये जालके कपटे गणे इति यादव:।) केशसंस्कारधूपै: वनिताकेशवासनार्थै: गन्धद्रव्यधूपै: इत्यर्थ: (अत्र संस्कारधूपयो: तादर्थ्येऽपि यूपदार्वादिवत् प्रकृतिविकारत्वाभावात् अश्वघासादिवत् षष्ठीसमासो न चतुर्थीसमास:।) उपचितवपु:परिपुष्टशरीर: बन्धौ बन्धुरिति वा प्रीत्या भवनशिखिभि:गृहमयूरै: दत्त: कृत्यम् एव उपहार: बलिर्यस्मै स तथोक्त: (उपायनमुपयाच्ञमुपहारस्तथोपदेत्यमर:।) कुसुमै: सुरभिषु सुगन्धिषु ललितवनिता: सुन्दरस्त्रिय: (ललितं त्रिषु सुन्दरमिति शब्दार्णवे।) तासां पादरागेण लाक्षारसेन अङ्कितेषु चिह्नितेषु हर्म्येषु धनिकभवनेषु अस्या: उज्जयिन्या: लक्ष्मीं पश्यन् अध्वना अध्वगमनेन खेदं क्लेशं नयेथा: अपनय॥ ३२॥

भर्तुरिति। भर्तु: स्वामिन: नीलकण्ठस्य भगवत: कण्ठस्येव छविर्यस्य असौ कण्ठच्छवि: इति हेतो: गणै: प्रथमै: (गणस्तु गणनायां स्यात् गणिते प्रमथे चये इति शब्दार्णवे।) सादरं यथा तथा वीक्ष्यमाण: सन् प्रिय-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीड़ानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥३४॥
अथन्यस्मिन् जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।

वसुत्राट्स्यात् अतिप्रियत्वं भवेत् इति भावः त्रयाणां भुवनानां समाहारः त्रिभुवनम् (तद्धितार्थेत्यादिना समासः ।) तस्य गुरोः त्रैलोक्यनाथस्य चण्डीश्वरस्य कात्यायनीवल्लभस्य पुण्यं पावनं धाम महाकालाख्यं स्थानं यायाः गच्छ (विध्यर्थे लिङ् ।) श्रेयस्करत्वात् सर्वथा गन्तव्यम् इति भावः (उक्तञ्च स्कान्दे आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम् । मर्त्यलोके महाकालं दृष्ट्वा कामितमाप्नुयादिति ।) न केवलं मुक्तिस्थानमिदं किन्तु विलासस्थानमपीत्याह धूतेति कुवलयरजोगन्धिभिः उत्पल-परागगन्धवद्भिः तोयक्रीड़ासु निरतानाम् आसक्तानां युव-तीनां स्नानं स्नानीयं चन्दनादि (करणे ल्युट् । स्नानीयेऽभिषवे स्नानमिति यादवः ।) तेन तिक्तैः सुरभिभिः (कटुतिक्त-कषायास्तु सौरभे च प्रकीर्त्तिता इति हलायुधः ।) सौगन्ध्यातिशयार्थं विशेषणद्वयम् गन्धवत्याः नाम नद्याः तत्रत्यायाः मरुद्भिः मारुतैः धूतोद्यानं कम्पितोपवनम् इति धात्वो विशेषणम् ॥ ३४ ॥

अथेति । हे जलधर महाकालं नाम पूर्वोक्तं चण्डीश्वरस्थानम् अन्यस्मिन् सन्ध्यातिरिक्तेऽपि काले

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्॥३५
पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ता

आसाद्य प्राप्य ते तव स्थातव्यं त्वया स्थातव्यम् इत्यर्थः (कृत्यानां कर्त्तरि वेति षष्ठी।) यावत् यावता कालेन भानुः सूर्य्यः नयनविषयं दृष्टिपथम् अत्येति अतिक्रामति आ अस्तमयात् स्थातव्यम् इत्यर्थः (यावत् इत्येतत् अवधारणार्थं यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमरः।) किमर्थम् अत आह कुर्वन्निति श्लाघनीयां प्रशस्यां शूलिनः शिवस्य सन्ध्यायां बलिः पूजा तत्र पटहतां कुर्वन् सम्पादयन् आमन्द्राणाम् ईषद्गभीराणां गर्जितानाम् अविकलम् अखण्डं फलं लप्स्यसे प्राप्स्यसि (लभेः कर्त्तरि लृट्।) महाकालनाथबलिपटहत्वेन विनियोगात् ते गर्जितसाफल्यं स्यात् इत्यर्थः॥ ३५॥

पादन्यासैरिति। तत्र सन्ध्याकाले पादन्यासैः चरणनिक्षेपैः नृत्यार्थैः क्वणिताः शब्दायमानाः रशनाः यासां ताः तथोक्ताः (क्वणतेरकर्म्मकत्वात् गत्यर्थाकर्म्मकेत्यादिना वर्त्तरि क्तः।) लीलया विलासेन अवधूतैः कम्पितैः रत्नानां कङ्कणमणीनां छायया कान्त्या खचिताः रुचिताः वलयः चामरदण्डाः येषां तैः (वलिश्चामरदण्डे च जराविन्नघचर्म्मणीति विश्वः) चामरैः बालव्यजनैः क्लान्त-

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्तेत्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्३६
पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः ।

इत्याः (एतेन दैशिकं नृत्यं सूचितम् तदुक्तं नृत्यसर्वस्वे खड्गकन्दुकवस्त्रादिदण्डिकाचामरस्रजः । वीणाञ्च हस्ता यत् कुर्युर्नृत्यं तत् दैशिकं भवेदिति ।) वेश्याः महाकालनाथम् उपेत्य नृत्यन्त्यो गणिकाः त्वत्तो नखपदेषु नखक्षतेषु सुखान् सुखकरान् (सुखहेतौ सुखे सुखमिति शब्दार्णवे ।) वर्षस्य अग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् अपाङ्गान् आमोक्ष्यन्ते परैः उपक्षताः सत्यः मयः प्रत्युपकुर्वन्ति इति भावः । कामिनीदर्शनीयत्वलक्षणं शिवोपासनाफलं सद्यो लप्स्यसे इति ध्वनिः ॥ ३६ ॥

पश्चादिति । पश्चात् सन्ध्यावन्दनानन्तरं पशुपतेः शिवस्य नृत्यारम्भे ताण्डवप्रारम्भे प्रतिनवजवापुष्परक्तं प्रत्यग्रजवाकुसुमारुणं सन्ध्यायां भवं सान्ध्यं तेजो दधानः उच्चैः उच्चतं भुजा एव तरवः तेषां वनं मण्डलेन मण्डलाकारेण अभिलीनः अभिव्याप्तः सन् (कर्त्तरि क्तः ।) भवान्या भवपत्न्या (इन्द्रवरुणभवशर्वेत्यादिना ङीष् आनुगागमश्च ।) भ्रान्तः उद्वेगः गजाजिनदर्शनभयं ययोः ते अत एव स्तिमिते निश्चले नयने यस्मिन् कर्मणि तत् तथोक्तम्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कृत्वारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३७॥

उद्वेगस्त्वरिते क्लेशे भये मन्यरगामिनीति शब्दार्णवे।) भक्तिः पूज्येषु अनुरागः (भावार्थे क्तिन्प्रत्ययः।) दृष्टा भक्तिर्यस्य स दृष्टभक्तिः सन् पशुपतेः आर्द्रं शोणिताद्रं यत् नागाजिनं गजचर्म (अजिनं चर्म क्लीबे स्त्रीत्वमरः।) तत्र इच्छां हर निवर्त्तय त्वम् एव तत्स्थाने भव इत्यर्थः। गजासुरमर्दनानन्तरं भगवान् महादेवः तदीयम् आर्द्राजिनं भुजमण्डलेन बिभ्रत् ताण्डवं चकार इति प्रसिद्धिः। दृष्टभक्तिरिति कथं रूपसिद्धिः दृष्टशब्दस्य स्त्रियाः पुंवत् इत्यादिना पुंवद्भावस्य दुर्घटत्वात् अपूरणीप्रियादिष्विति निषेधात् भक्तिशब्दस्य प्रियादिषु पाठादिति तदेतच्चोद्यं दृढभक्तिरिति शब्दम् आश्रित्य प्रतिविहितं। गणव्याख्याने दृढं भक्तिरस्येति नपुंसकं पूर्वपदम् अदार्ढ्यनिवृत्तिमात्रपरत्वे दृढशब्दात् लिङ्गविशेषस्य अनुपकारित्वात् स्त्रीत्वम् अविवक्षितमिति। भोजराजस्तु भक्तौ च कर्मसाधनायाम् इत्यनेन सूत्रेण भज्यते सेव्यते इति कर्मार्थत्वे भवानीभक्तिरित्यादि भवति भावसाधनायां तु स्थिरभक्तिर्भवान्यामित्यादि भवतीत्याह। तदेतत् सर्वं सम्यक् विवेचितं रघुवंशसञ्जीवन्यां दृढभक्तिरितिज्येष्ठे इत्यत्र। तस्मात् दृष्टभक्तिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वेन नपुंसकत्वेन च रूपसिद्धिरस्तीति स्थितम्॥ ३७॥

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मास्म भूर्विक्लवास्ताः ३८

इत्थं महाकालनाथस्य सेवाप्रकारमभिधाय पुनरपि नगरसञ्चारप्रकारमाह गच्छन्तीनामिति । तत्र उज्जयिन्यां नक्तं रात्रौ रमणवसतिं प्रियभवनं प्रति गच्छन्तीनां योषितां अभिसारिकाणाम् इत्यर्थः सूचिभिः भेद्यैः अतिसान्द्रैरित्यर्थः तमोभिः रुद्धालोके निरुद्धदृष्टिप्रसारे नरपतिपथे राजमार्गे कनकस्य निकषः निकष्यते: इति व्युत्पत्त्या निकषोपलगतरेखा तस्येव स्निग्धं तेजो यस्याः तया (स्निग्धं तु मसृणे सान्द्रे रम्ये क्लीवं तु तेजसीति शब्दार्णवे ।) सदाक्षा अद्रिणा एकदिक् सौदामनी विद्युत् (तेनैकदिग्लिङ्गण् प्रत्ययः ।) तया उर्वीं मार्गं दर्शय किञ्च तोयोत्सर्गस्तनिताभ्यां दृष्टिगर्जिताभ्यां मुखरः शब्दायमानो मास्म भूः कृतः ताः योषितः विक्लवाः भीरवः ततो दृष्टिगर्जिते न कार्ये इत्यर्थः । नात्र तोयोत्सर्गसहितं स्तनितमिति विग्रहः विशिष्टस्यैव केवलस्तनितस्यापि अनिष्टत्वात् न च द्वन्द्वपक्षे अल्पाच्तरमिति पूर्वनिपातशास्त्रविरोधः लक्षणहेत्वोः क्रियायाः इति सूत्रे विपरीतनिर्देशेन पूर्वनिपातशास्त्रस्य अनित्यज्ञापनादिति ॥ ३८ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥३९॥
तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।

तामिति । चिरं विलसनात् स्फुरणात् खिन्नं विद्युत् एव कलत्रं यस्य स भवान् सुप्ताः पारावताः कलरवाः यस्यां तस्यां विविक्तायाम् इत्यर्थः (पारावतः कलरवः कपोत इत्यमरः ।) जनसञ्चारः तत्र असाधारण एवेति भावः कस्याञ्चित् भवनस्य वलभौ आच्छादने उपरिभागे इत्यर्थः (आच्छादनं स्याद्वलभौ गृहाणामिति हलायुधः । तां रात्रिं नीत्वा सूर्ये दृष्टे सति उदिते सति इत्यर्थः पुनरपि अध्वशेषं वाहयेत् तथाहि सुहृदां मित्राणाम् अभ्युपेता अङ्गीकृता अर्थस्य प्रयोजनस्य कृत्या क्रिया यैः ते अभ्युपेतसुहृदर्था इत्यर्थः (सापेक्षत्वेऽपि गमकत्वात् समासः । कृत्या क्रियादेवतयोः कार्ये स्त्री कृपिते त्रिष्विति यादवः । कृत्यः श चेति चकारात् क्यप् ।) न मन्दायन्ते खलु न मन्दाः भवन्ति हि न विलम्बन्ते इत्यर्थः । (लोहितादिडाज्भ्यः क्यष् इति क्यष् वा क्यच इत्याख्यातपदम्) ॥३९॥

तस्मिन्निति । तस्मिन् काले पूर्वोक्ते सूर्योदयकाले

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः
प्रत्यादेशात्त्वयि करुधि स्यादनल्पाभ्यसूयः ॥४०॥

प्रणयिभिः प्रियतमैः खण्डितानां योषितां नायिकाविशेषाणाम् (ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति दशरूपके।) नयनसलिलं शान्तिं नेयं नेतव्यम् (नयतिर्द्विकर्मकः।) अतो हेतोः भानोः वर्त्म पाशु शीघ्रं त्यज तस्य आवरको मा भूः इत्यर्थः। विपक्षे अनिष्टमाचष्टे सोऽपि भानुः नलानि अम्बुजानि अस्याः सन्तीति नलिनी पद्मिनी (हृषीऽम्बुजे नलं ना तु राज्ञि नाले तु न स्त्रियामिति शब्दार्णवे।) तस्याः स्वकान्तायाः कमलं स्वकुसुमम् एव वदनं तस्मात् प्रालेयं हिमम् एव अस्रम् अश्रु प्रहर्तुं शमयितुं प्रत्यादेशः प्रत्यागतः नलिन्याश्च भर्तुर्भानोः देशान्तरे नलिन्यन्तरगमनात् खण्डितात्वम् इत्याशयः ततः त्वयि करान् अंशून् रुणद्धि इति करुधत् (क्विप्।) तस्मिन् करुधि सति हस्तरोधिनि सति इति च गम्यते (बलिहस्तांशवः करा इत्यमरः।) अनल्पाभ्यसूयः अधिकविद्वेषः स्यात् प्रायेण इच्छाविशेषविघातात् द्वेषो रोषविशेषश्च कामिनाम् इति भावः। किञ्च ब्राह्मणं चार्कसोमानं विष्णुं वा द्वेष्टि यो जनः। श्रेयांसि तस्य नश्यन्ति रौरवञ्च भवेत् ध्रुवमिति निषेधात् कार्यहानिश्च इति ध्वनिः॥ ४०॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

गम्भीराया: पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्या: कुमुदविशदान्यर्हसि त्वं न धैर्य्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥४१॥
तस्या: किञ्चित्करधृतमिव प्राप्तवानौरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।

गम्भीराया इति । गम्भीराया: नाम सरित: उदात्त-नायिका च ध्वन्यते प्रसन्ने अनुरक्तत्वात् दोषरहिते चेतसि इव प्रसन्ने निर्मले पयसि प्रकृत्या स्वभावेन सुभग: सुन्दर: (सुन्दरेऽधिकभाग्ये च दर्शनेतरवासरे। तुरीयांशे स्त्रीमति च सुभग: इति शब्दार्णवे ।) ते तव छाया चासौ आत्मा च सोऽपि प्रतिबिम्बशरीरं वा प्रवेशं लप्स्यते साक्षात् प्रवेशम् अनिच्छोरपि इति भाव: तस्मात् छायाद्वारापि प्रवेशावश्यम्भावित्वात् अस्या: गम्भीराया: कुमुदवत् विश-दानि धवलानि चटुलानि शीघ्राणि शफराणां मीनानाम् उद्वर्तनानि उल्लुण्ठितान्येव प्रेक्षितानि अवलोकनानि (विष् स्यात् चटुलं शीघ्रमिति विश्व: ।) एतावदेव गम्भी-राया अनुरागलिङ्गम् धैर्य्यात् धार्ष्ट्यात् मोघीकर्तुं विफ-लीकर्तुं न अर्हसि न अनुरक्ता विप्रलब्धव्या इत्यर्थ: । धूर्तलक्षणं तु क्लिश्नाति नित्यं गमितां कामिनीमिति सुन्दर: । उपैत्वरक्तां यत्नेन रक्तां धूर्तो विमुञ्चतीति ॥४१॥

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः॥४२॥
त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।

तस्या इति। हे सखे प्राप्ता वानीरशाखा वेतसशाखा येन तत् तथोक्तम् अत एव किञ्चित् ईषत् करधृतं हस्तावलम्बितम् इव स्थितं सुक्तः त्यक्तः रोधः तटम् एव नितम्बः कटिः येन तत् तथोक्तम् (नितम्बः पश्चिमे श्रोणिभागेऽद्रिकटके कटाविति यादवः।) नीलं श्यामवर्णं तस्याः गम्भीरायाः सलिलम् एव वसनं हृत्वा अपनीय (प्रस्थानसमये प्रियसोवसनहरणं विरहतापापनोदनार्थम् इति प्रसिद्धम्।) लम्बमानस्य पीतसलिलभरात् लम्बमानस्य अत्यव जघनारूढस्य ते तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि कृच्छ्रत्वे हेतुमाह ज्ञातेति ज्ञातास्वादः अनुभूतरसः सः पुमान् विवृतं प्रकटोकृतं जघनं कटिः तत्पूर्वभागो वा यस्याः ताम् (जघनं स्यात् कटौ पूर्वश्रोणिभागापरांशयोरिति यादवः।) विहातुं त्यक्तुं समर्थः न कोऽपि इत्यर्थः॥ ४२॥

त्वदिति। त्वन्निष्यन्देन तव वृष्ट्या उच्छ्वसितायाः उपबृंहितायाः वसुधायाः भूमेः गन्धस्य सम्पर्केण रम्यः सुरभिः इत्यर्थः (स्रोतःशब्देन इन्द्रियवाचिना तद्विषयो घ्राणं लक्ष्यते स्रोत इन्द्रिये निम्नगारये इत्यमरः।)

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नीचैर्वास्त्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम्॥४३
तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः।

स्रोतोरन्ध्रेषु नासाग्रकुहरेषु यत् ध्वनितं शब्दः तेन सुभगं यथा तथा दन्तिभिः गजैः पीयमानः वसुधागन्धलोभात् आघ्रायमाण इत्यर्थः अनेन माद्यम् उच्यते काननेषु वनेषु उदुम्बराणां जन्तुफलानाम् (उदुम्बरे जन्तुफलो यज्ञाङ्गो हेमदुग्धक इत्यमरः।) परिणमयिता परिपाचयिता (मितां च्छ्व इति च्छ्वः।) शीतो वायुः देवपूर्वं देवशब्दपूर्वं गिरिं देवगिरिम् इत्यर्थः उपजिगमिषोः उपगन्तुम् इच्छोः (गमेः सन्नन्तादुप्रत्ययः।) ते तव नीचैः शनैः वास्यति त्वां वोजयिष्यति इत्यर्थः। सम्बन्धमात्रविवक्षायां षष्ठी। देवपूर्वं गिरिम् इत्यत्र देवपूर्वत्वं गिरिशब्दस्य नतु संज्ञिनस्तदर्थस्येति संज्ञायाः संज्ञिगतत्वाभावात् अवाच्यवचनं दोषमाहुः आलङ्कारिकाः तदुक्तम् एकावल्यां यद्वाच्यस्य वचनमवाच्यवचनं हि तदिति। समाधानं तु देवशब्दविशेषितेन गिरिशब्देन शब्दपरेण मेघोपगमयोग्यो देवगिरिर्लक्ष्यते इति कथञ्चित् सम्पाद्यम्॥ ४३॥

तत्रेति। तत्र देवगिरौ नियता वसतिः यस्य तं नित्यसन्निहितम् इत्यर्थः (पुरा किल तारकाख्यासुरविजयसन्तुष्टसुरप्रार्थनावशात् भगवान् भवानीनन्दनः स्कन्दो नित्यम्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मात्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥४४॥

अहमिह सह शिवाभ्यां वसामि इत्युक्ता तत्र वसति इति प्रसिद्धिः ।) स्कन्दं कुमारं स्वामिनं पुष्पाणां मेघः पुष्पमेघः पुष्पमेघोऽतात्मा कामरूपत्वात् पुष्पवर्षुक मेघोऽतविग्रहः सन् व्योमगङ्गाजलार्द्रैः पुष्पासारैः पुष्पसम्पातैः (धारासम्पात आसार इत्यमरः ।) भवान् स्वयम् एव स्नपयतु अभिषिञ्चतु स्वयं पूजायाः उत्तमत्वात् इति भावः । (तथा च शम्भुरहस्ये स्वयं यजति चेत् देवस्तुत्तमा सोदराजजैः । मध्यमा याजयेदृत्विग्भिरधमा याजनक्रियेति ।) स्कन्दस्य पूज्यत्वसमर्थकम् अर्थान्तरं न्यस्यति रक्षेति तत् भगवान् स्कन्द इत्यर्थः (विधेयप्राधान्यात् नपुंसकनिर्देशः ।) वासवस्य इमाः वासव्यः (तस्येदमित्यण्) तासां वासवीनाम् ऐन्द्रीणां चमूनां सेनानां रक्षा एव हेतुः तस्य रक्षाहेतोः रक्षया कारणेन रक्षार्थम् इत्यर्थः (षष्ठी हेतुप्रयोगे इति षष्ठी ।) नवशशिभृता भगवता चन्द्रशेखरेण वहति इति वहः (पचाद्यच् ।) हुतस्य वहः हुतवहः वह्निः तस्य मुखे संभृतं सञ्चितम् आदित्यम् अतिक्रान्तम् अत्यादित्यम् (अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति समासः ।) तेजो हि साक्षात् भगवतो हरस्य एव मूर्त्तान्तरम् इत्यर्थः अतः पूज्यमिति भावः । मुखग्रहणं तु मुखत्व सूचनार्थं तदुक्तं

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी-
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्त्तयेथाः ॥ ४५ ॥

अभ्यरहस्ये गवां पश्चात् द्विजस्याङ्घ्रियोगिनां हृत् कवेर्वचः ।
परं शुचितमं विद्यान्मुखं स्त्रीवह्निवाजिनामिति ॥ ४४ ॥

ज्योतिरिति । ज्योतिषः तेजसः लेखाः राजयः तासां वलयं मण्डलम् अस्य अस्तीति तथोक्तं गलितं भ्रष्टं नतु स्खलितात् स्वयं छिन्नम् इति भावः यस्य मयूरस्य बर्हं पिच्छम् (पिच्छबर्हे नपुंसके इत्यमरः ।) भवानी गौरी पुत्रप्रेम्णा पुत्रस्नेहेन कुवलयस्य दलं पत्रं यत्प्रापि यद्योगि यथा तथा कर्णे करोति दलेन सह धारयति इत्यर्थः यद्वा दलप्रापि दलभाजि दलार्हे कर्णे करोति (क्विबन्तात् सप्तमी ।) दलं परिहृत्य तत्स्थाने बर्हं धत्ते इत्यर्थः । नाथस्तु कुवलयदलक्षेपीति पाठमनुसृत्य क्षेपो निन्दा अपसारणं वेति व्याख्यातवान् । हरशशिरुचा हरशिरश्चन्द्रिकया धौतापाङ्गं स्वतोऽपि शौक्ल्यात् अतिधवलितनेत्रान्तम् (आपाङ्गो नेत्रयोरन्तावित्यमरः ।) पावकस्य अग्नेः अपत्यं पावकिः स्कन्दः (अत इञ् इति इञ् ।) तस्य तं पूर्वोक्तं मयूरं पश्चात् पुष्पाभिषेचनानन्तरम् अद्रेः देवगिरेः कर्तुः ग्रहणेन गुहासंक्रमणेन गुरुभिः प्रतिध्वानमद्भिः इत्यर्थः गर्जितैः नर्त्तयेथाः नृत्यं

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा-
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ४९

कारयमादृङ्किभावेन भगवन्तं कुमारम् उपास्स्व इति भावः । नर्त्तयेथा इत्यत्र अणावकर्मकाच्चित्तवत्कर्तृकादित्यात्मनेपदापवादः निगरणचलनार्थेभ्यश्चेति परस्मैपदं न भवति तस्य न पादम्याङ्यमाङ्यस परिसृहरुचिनृतिवदवस इति प्रतिषेधात् ॥ ४५ ॥

आराध्येति । एनं पूर्वोक्तं शराः वाणतृणानि (शरो बाणे वाणतृणे इति शब्दार्णवे ।) तेषां वनं शरवणम् (प्रनिरन्तः शरेत्यादिना णत्वम् ।) तत्र भवः जन्म यस्य तं शरवणभवं देवं स्कन्दम् (शरजन्मा षडानन इत्यमरः । अवर्ज्यो वडुर्नोहिर्व्यधिकरणो जन्मादुत्तरपद इति वामनः । अवर्ज्यः अगतिकत्वात् आश्रयणीय इत्यर्थः) आराध्य उपास्यवीणिभिः वीणावद्भिः (व्रीड्यादित्वादिनिः ।) सिद्धद्वन्द्वैः सिद्धमिथुनैः भगवन्तं स्कन्दम् उपवीणयितुम् आगतैः इति भावः जलकणभयात् जलमेकस्य वीणाकूजनप्रतिबन्धकत्वात् इति भावः मुक्तमार्गः त्यक्तवर्त्मा सन् उल्लङ्घिताध्वा कियन्तम् अध्वानं गत इत्यर्थः सुरभितनयानां गवाम् आलम्भेन संज्ञपनेन जायते इति तथोक्तां भुवि लोके स्रोतोमूर्त्या प्रवाहरूपेण परिणतां रूपविशेषम्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥४७॥

आपन्नां रन्तिदेवस्य दशपुरपतेः महाराजस्य कीर्त्तिं चर्मण्वत्याख्यां नदीम् इत्यर्थः मानयिष्यन् सत्करिष्यन् व्यालम्बेथाः आलम्बा अवतरेः इत्यर्थः । पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेषु एकत्र सम्भृतात् रक्तनिष्यन्दात् चर्मराशेः काचित् नदी सस्यन्दे सा चर्मण्वतीति आख्यायते ॥ ४६ ॥

त्वयीति । शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेः चौरे वर्णचौरे तत्तुल्यवर्णे इत्यर्थः त्वयि जलम् आदातुम् अवनते सति पृथुम् अपि दूरभावात् दूरत्वात् तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिन्धोः चर्मण्वत्याख्यायाः प्रवाहं गगने गतिर्येषां ते गगनगतयः खेचराः सिद्धगन्धर्वादयः (अयमपि बहुव्रीहिः पूर्ववत् जन्मादुत्तरपदेषु द्रष्टव्यः ।) नूनं सत्यं दृष्टीः आवर्ज्य नियम्य एकम् एकयष्टिकं स्थूलः महान् मध्यः मध्यमणीभूतः इन्द्रनीलः यस्य तं भुवः भूमेः मुक्तागुणं मुक्ताहारम् इव प्रेक्षिष्यन्ते । अत्र अत्यन्तनीलमेघसङ्गस्य प्रवाहस्य मुक्तामुक्तागुणत्वेन उत्प्रेक्षणात् उत्प्रेक्षैव द्योतयति इवशब्देन व्यज्यते । निरुक्त

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तामुत्तौर्य्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।
कुन्दक्षेपानुगमधुकरश्रीसुषामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ४८ ॥

कारस्तु तत्र तत्रोपमा यत्र इवशब्दस्य दर्शनमिति इवशब्ददर्शनात् अत्राप्युपमैवेति वभाम ॥ ४७ ॥

तामिति। तां चर्मण्वतीम् उत्तीर्य्य भ्रुवोलताः इव भ्रूलताः (उपमितिसमासः) तासां विभ्रमाः विलासाः परिचिताः कृताः येषु तेषां पक्ष्माणि नेत्रलोमानि (पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनीति शाश्वतः)। तेषाम् उत्क्षेपात् उन्नमनात् हेतोः कृष्णाश्च ताः शाराश्च कृष्णशाराः नीलशाराः (वर्णो वर्णेनेति समासः। कृष्णरक्तसिताः शारा इति यादवः। ततश्च शारशब्दात् एव सिद्धे कार्ष्ण्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थं रक्तत्वं तु न विवक्षितम् उपमानानुसारात् तस्य स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधात् इतरस्य अप्रसङ्गात् क्वचित् भावकथनं तु उपपत्तिविषयम्।) उपरि विलसन्त्यः कृष्णशाराः प्रभाः येषां तेषां कुन्दानि माध्यकुसुमानि तेषां क्षेपः इतस्ततः चलनं तस्य अनुगाः अनुसारिणः ये मधुकराः तेषां श्रियं सुषन्ति इति तथोक्तानां क्षिप्यमाणकुन्दानुधाविमधुकरकल्पानाम् इत्यर्थः दशपुरं रन्तिदेवस्य नगरं तत्र वध्वः स्त्रियः (वधूर्जाया स्नुषा स्त्री च इत्य-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ब्रह्मावर्त्तं जनपदमथ च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा-
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥४९॥

मरः ।) तासां नेत्रकौतूहलानां नेत्राभिलाषाणां साभिलाषदृष्टीनाम् इत्यर्थः आत्मबिम्बं स्वमूर्त्तिं पात्रीकुर्वन् विषयीकुर्वन् व्रज गच्छ ॥ ४८ ॥

ब्रह्मावर्त्तमिति । अत्र मनुः सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते इति । अथ अनन्तरं ब्रह्मावर्त्तं नाम जनपदं देशं छायया अनातपमण्डलेन गाहमानः प्रविशन् न तु स्वरूपेण (पीठक्षेत्रायमादीनि परिहृत्यान्यतो व्रजेत् इति वचनात् ।) क्षत्रप्रधनपिशुनम् अद्यापि शिरःकपालादिसत्तया कुरुपाण्डवयुद्धसूचकम् इत्यर्थः (युद्धमायोधनं जन्म प्रधनं प्रविदारणमित्यमरः ।) तत् प्रसिद्धं कुरूणाम् इदं कौरवं क्षेत्रं भजेथाः कुरुक्षेत्रं व्रज इत्यर्थः यत्र कुरुक्षेत्रे गाण्डो अस्य अस्तीति गाण्डीवं धनुर्विशेषः (गाण्डाज्जगात् संज्ञायामिति मत्वर्थीयो वप्रत्ययः । कपिध्वजस्य गाण्डीव-गाण्डिवौ पुनपुंसको इत्यमरः ।) तत् धनुः यस्य सः गाण्डीवधन्वा अर्जुनः (वा संज्ञायामित्यनङादेशः ।) शितशरशतैः निशितबाणसहस्रैः राज्ञां राजन्यानां मुखानि धाराणाम् उदकधाराणां पातैः कमलानि त्वम्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

२४१८
संस्कृत
६

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
मन्तःशुद्धस्त्वमपि भविता वर्त्मभावेन कृष्णः॥५०॥

इव अभ्यवर्षत् अभिमुखं दृष्टवान् शरवर्षेण शिरांसि चिच्छेद इत्यर्थः ॥ ४९ ॥

हित्वेति । बन्धुप्रीत्या कुरुपाण्डवस्नेहेन न तु भयेन समरविमुखो युद्धनिस्पृहः लाङ्गलम् अस्य अस्तीति लाङ्गली हलधरः अभिमतरसात् अभीष्टरसात् तथा रेवत्याः स्त्रियायाः लोचने एव अङ्कः प्रतिबिम्बितत्वात् चिह्नं यस्याः तां हालां सुराम् (सुराहलिप्रिया हालेत्यमरः । अभिप्रयुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमप्यत्रैव कविप्रयोगात् साध्विति उदाजहार वामनः ।) हित्वा त्यक्त्वा दुस्त्यजाम् अपि इति भावः याः सारस्वतीः अपः सिषेवे हे सौम्य सुभग त्वं तासां सरस्वत्याः नद्याः इमाः सारस्वत्यः तासाम् अभिगमं सेवां कृत्वा अन्तः अन्तरात्मनि शुद्धः निर्मलः निर्दोषः भविता (खुल्लृटावितिं लृट् ।) अपि सद्य एव पूतो भविष्यति इत्यर्थः (वर्त्तमानसामीप्ये वर्त्तमानवद्वेति वर्त्तमानप्रत्ययः ।) वर्त्मभावेन वर्णेन एव कृष्णः श्यामः नतु पापेन इत्यर्थः अन्तःशुद्धिरेव सम्यग्या नतु बाह्या बहिःशुद्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वतसलिलसेवी तत्र भगवान्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणकरोदिन्दुलग्नोर्मिहस्ता ॥५१॥

बलभद्र एव निदर्शनम् अतो भवतापि सरस्वती सर्वथा सेवितव्या इति भावः ॥ ५० ॥

तस्मादिति । तस्मात् कुरुक्षेत्रात् कनखलस्य अदेः समीपे अनुकनखलम् (अनुर्यत्समयेत्यव्ययीभावः ।) शैलराजात् हिमवतः अवतीर्णां सगरतनयानां स्वर्गसोपानपङ्क्तिं स्वर्गप्राप्तिसाधनभूताम् इत्यर्थः जह्नो नाम राज्ञः कन्यां जाह्नवीं गच्छेः गच्छ (विध्यर्थे लिङ् ।) या जाह्नवी गौर्याः वक्त्रे या भ्रूकुटिरचना सापत्न्यरोषात् भ्रूभङ्गकरणं तां फेनैः विहस्य हसित्वा इव (धावल्यात् फेनानां हासत्वेन उत्प्रेक्षा ।) इन्दौ शिरोमाणिक्यभूते लग्नाः ऊर्ध्वगाः एव हस्ताः यस्याः सा इन्दुलग्नोर्मिहस्ता सती शम्भोः केशग्रहणम् अकरोत् यथा काचित् प्रौढानायिका सपत्नीम् असहमाना स्वावज्ञाभयं प्रकटयन्ती स्वभर्तारं सह शिरोरत्नेन केशेषु आकर्षति तद्वत् इति भावः । इदञ्च पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात् पतन्तीं गङ्गां गङ्गाधरो जटाजूटेन जग्राहेति कथाम् उपजीव्य उक्तम् ॥ ५१ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वच्चेदच्छस्फटिकविशदं तर्कयेत्तिर्यगम्भः
संसर्पन्त्या सपदि भवतः स्रोतसि च्छायया सौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥ ५२ ॥
आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।

तस्या इति । सुरगज इव कश्चित् दिग्गज इव व्योम्नि पश्चात् अर्धं पश्चार्धम् (पृषोदरादित्वात् साधुः ।) तेन लम्बते इति पश्चार्धलम्बी सन् पश्चार्धभागेन व्योम्नि स्थित्वा पूर्वार्धेन जलान्यत्ति इत्यर्थः (केचित् पूर्वार्धलम्बीति पठन्ति ।) अच्छस्फटिकविशदं निर्मलस्फटिकावदातं तस्याः गङ्गायाः अम्भः तिर्यक् तिरश्चीनं यथा तथा पातुं त्वं तर्कयेः विचारयेः चेत् सपदि स्रोतसि प्रवाहे संसर्पन्त्या संक्रामन्त्या भवतः छायया प्रतिबिम्बेन असौ गङ्गा अस्थाने प्रयागात् अन्यत्र उपगतः प्राप्तः यमुनासङ्गमः यया सा तथाभूता इव अभिरामा स्यात् ॥ ५२ ॥

आसीनानामिति । आसीनानाम् उपविष्टानां मृगाणां कस्तूरिकामृगाणाम् अन्यथा नाभिगन्धानुपपत्तेः नाभिगन्धैः कस्तूरीगन्धैः तेषां तदुद्भवत्वात् अत एव मृगनाभिसंज्ञा च (मृगनाभिर्मृगमदः कस्तूरी चेत्यमरः ।) अथवा नाभयः कस्तूर्यः (नाभिः प्रधाने कस्तूर्यां मदे च

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्॥५३॥
तस्योद्दायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः।

क्वचिदीरित इति विश्वः।) तासां गन्धैः सुरभिताः सुरभीकृताः शिलाः यस्य तं तस्या गङ्गायाः एव प्रभवति अस्मात् इति प्रभवः कारणं तुषारैः गौरं सितम् (अवदातः सितो गौर इत्यमरः।) अचलं प्राप्य विनीयते अनेन इति विनयनम् (करणे ल्युट्) अध्वश्रमस्य विनयने अपनोदके तस्य हिमाद्रेः शृङ्गे निषण्णः सन् शुभ्रः यः त्रिनयनस्य त्र्यम्बकस्य वृषः वृषभः (सुरभते वृषभे वृष इत्यमरः।) तेन उत्खातेन विदारितेन पङ्केन सह उपमेयाम् उपमातुम् अर्हां शोभां वक्ष्यसि वोढासि। वहतेर्ण्यट्। त्रिनयनेत्यत्र पूर्वपदात् संज्ञायामग इति णत्वं न भवति चुम्बादिषु चेति निषेधात्। तस्याः प्रभवम् इत्यादिना हिमाद्रौ मेघस्य वैवाहिको गृहविहारो ध्वन्यते ॥ ५३ ॥

तमिति। वायौ वनवाते सरति वाति सति सरलानां देवदारुद्रुमाणां स्कन्धाः प्रदेशविशेषाः (अस्त्री प्रकाण्डः स्कन्धः सामूलाच्छाखावधेस्तरोरित्यमरः।) तेषां संघट्टेन संघर्षेण जन्म यस्य स तथोक्तः (जन्मोत्तरपदत्वात् व्यधिकरणोऽपि बहुव्रीहिः साधुरित्युक्तम् ।) उल्काभिः स्फुलिङ्गैः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अर्हस्येनं शमयितुमुलं वारिधारासहस्रै
रापन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्॥५४
ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम्।

चपिताः निर्दग्धाः चमरीणां बालभाराः केशसमूहाः येन दव एव अग्निः दवाग्निः वनवह्निः (वने च वनवह्नौ च दवोदाव इष्यते इति यादवः।) तं हिमाद्रिं बाधेत चेत् पीडयेत् यदि एनं दवाग्निं वारिधारासहस्रैः शमयितुम् अर्हसि युक्तञ्च एतत् इत्याह उत्तमानां महतां सम्पदः समृद्धयः आपन्नानाम् आर्त्तानाम् आर्त्तिप्रशमनम् आपन्निवारणम् एव फलं प्रयोजनं यासां ताः तथोक्ताः हि अतो हिमाचलस्य दावानलक्षयात् शमयितव्यः इति भावः॥ ५४॥

य इति। तस्मिन् हिमाद्रौ संरम्भः कोपः (संरम्भः संक्रमे कोपे इति शब्दार्णवे।) तेन उत्पतने उत्प्लवने रभसः वेगः येषां ते तथोक्ताः (रभसो हर्षवेगयोरिति विश्वः।) ये शरभाः अष्टापदमृगविशेषाः (शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तरे इति विश्वः।) मुक्तः अध्वा शरभोत्प्लवनमार्गः येन तं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः (सम्भावनायां लिङ्।) भवतोऽतिदूरत्वात् स्वाङ्गभङ्गातिरिक्तं फलं नास्ति लङ्घनस्य इत्यर्थः तान् शरभान् तुङ्गता-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तान् कुर्वीथास्तुलकरकाद्दृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५५॥

सङ्घना: करका: वर्षोपला: (वर्षोपलस्तु करकेत्यमरः ।) तासां दृष्टिः तस्याः पातेन अवकीर्णान् विच्छिन्नान् कुर्वीथाः कुरुष्व (विध्यर्थे लिङ् ।) क्षुद्रोऽपि अधिक्षिपन् प्रतिपक्षः सद्यः प्रतिक्षेप्तव्यः इति भावः तथाहि आरभ्यन्ते इति आरम्भाः कर्माणि तेषु यत्नः उद्योगः स निष्फलः येषां ते तथोक्ताः निष्फलकर्मोपक्रमाः इत्यर्थः अतः के वा परिभवपदं तिरस्कारपदं न स्युः न भवन्ति सर्वे एव भवन्ति इत्यर्थः । यदत्र घनोपलस्तु करक इति यादवप्रकाशवचनात् करकशब्दस्य नियतपुंलिङ्गताभिप्रायेण करकाणाम् अवृष्टिरिति केषाञ्चित् व्याख्यानं तत् अन्ये न अनुमन्यन्ते वर्षोपलस्तु करकेत्यमरवचनव्याख्याने क्षीरस्वामिना वामण्डली च करकः सुगते च विनायक इति नानार्थे पुंस्यपि वक्ष्यतीति वदता उभयलिङ्गताप्रकाशनात् । यादवस्य तु पुंलिङ्गताविधाने तात्पर्यं न तु स्त्रीलिङ्गतानिषेधे इति न तद्विरोधोऽपि । करकस्तु करङ्के स्यादाकाशे च कमण्डलौ । पक्षिभेदे करी चापि करका तु घनोपले इति विश्वप्रकाशवचने तु उभयलिङ्गता व्यक्तैवेति न कुत्रापि विरोधवार्त्ता अत एव रुद्रः वर्षोपलस्तु करका करकोऽपि च दृश्यते इति ॥ ५५ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः।
यस्मिन् दृष्टे करणविगमाद्ऊर्ध्वमुद्भूतपापाः
सङ्कल्प्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥५९॥

तत्रेति। तत्र हिमाद्रौ दृषदि कस्याश्चित् शिलायां व्यक्तं प्रकटं शश्वत् सदा सिद्धैः योगिभिः (सिद्धिर्निष्पत्तियोगयोरिति विश्वः।) उपचितबलिं रचितपूजाविधिम् (बलिः पूजोपहारयोरिति यादवः।) अर्द्धमासौ इन्दुश्चेति अर्द्धेन्दुः (अर्द्धः खण्डे समेऽंशके इति विश्वः।) स मौलौ यस्य तस्य ईश्वरस्य चरणन्यासं पादविन्यासं भक्तिः पूज्येषु अनुरागः तया नम्रः सन् परीयाः प्रदक्षिणं कुरु (परिपूर्वादिणो लिङ्।) यस्मिन् पादन्यासे दृष्टे सति उद्भूतपापाः निरस्तकलुषाः सन्तः श्रद्दधानाः विश्वसन्तः पुरुषाः श्रद्धा विश्वासः आस्तिक्यबुद्धिरिति यावत् (श्रद्दधातेरुपसर्गेवदृत्तिर्वक्तव्येति अत्यूवार्त् दधातेः श्यानच्।) करणस्य चेतसस्य विगमात् ऊर्द्धं देहत्यागानन्तरम् (करणं साधकतमं चेतनाक्षेन्द्रियेष्वपीत्यमरः।) स्थिरं शाश्वतं गणानां प्रमथानां पदं स्थानम् (गणाः प्रमथसंख्योघा इति वैजयन्ती।) तस्य प्राप्तये सङ्कल्प्यन्ते समर्था भवन्ति। क्तृनेः पर्याप्तिवचनस्य अलमर्थत्वात् तद्योगे नमः स्वस्त्यादिना चतुर्थी अलमिति पर्याप्तार्थं-ग्रहणमिति भाष्यकारः। अव्यक्तं व्यक्तयामास शिवः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्य्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।
निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥५७॥

त्रीचरणद्वयम्। हिमाद्रौ गाम्भवादीनां सिद्धये सर्वकर्मणाम् दृष्ट्वा त्रीचरणं सम्यक् साधकः स्थिरयेत्तनुम्। इच्छाधीन-शरीरो हि विचरेच्च जगत्त्रयमिति शम्भुरहस्ये ॥ ५६ ॥

शब्दायन्त इति। हे मेघ अनिलैः पूर्य्यमाणाः कीचकाः वेणुविशेषाः (वेणवः कीचकास्ते स्युर्यें स्वनन्त्य-निलोद्धता इत्यमरः।) मधुरं श्रुतिसुखं यथा तथा शब्दायन्ते शब्दं कुर्वन्ति (शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे इति क्यङ्।) अनेन वंशवाद्यसम्पत्तिरुक्ता संसक्ताभिः संयुक्ताभिः वंशवाद्यानुयुक्ताभिर्वा संरक्ताभिरिति पाठे संरक्तकण्ठीभिः इत्यर्थः किन्नरीभिः किन्नरस्त्रीभिः त्रयाणां पुराणां समाहारः त्रिपुरम् (तद्धितार्थोत्तरपदेति समासः। यावादित्वात् नपुंसकत्वम्।) तस्य विजयः गीयते कन्दरेषु दरीषु (दरी तु कन्दरो वा स्त्रीत्यमरः।) ते तव निर्ह्रादः मुरजे वाद्यभेदे ध्वनिः इव मुरजध्वनिः इव इत्यर्थः स्यात् चेत् तर्हि तव चरणसमीपे पशुपतेः नित्यं सन्निहितस्य शिवस्य सङ्गीतं सम्यक् गीतं तत् एव अर्थः सङ्गीतार्थः सङ्गीतवस्तु (अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिखिल्यमरः।)

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ५८

समग्रः सम्पूर्णः भावो ननु भविष्यति खलु । भविष्यति गम्यादय इति भविष्यदर्थे णिनिः ॥ ५७ ॥

प्रालेयाद्रेरिति । प्रालेयाद्रेः हिमाद्रेः उपतटं तटसमीपे (अव्ययं विभक्त्यादिना समीपार्थेऽव्ययीभावः ।) तान् तान् (वीप्सायां द्विरुक्तिः ।) विशेषान् द्रष्टव्यार्थान् (विशेषोऽवयवे द्रव्ये द्रष्टव्योत्तमवस्तुनीति शब्दार्णवे ।) अतिक्रम्य अनुसरेः गच्छेः इति अनागतेन सम्बन्धः हंसानां द्वारं हंसद्वारम् (मानसप्रस्थायिनो हंसाः क्रौञ्चरन्ध्रेण सञ्चरन्ति इत्यागमः ।) भृगुपतेः जामदग्नस्य यशोवर्त्म यशः प्रवृत्तिकारणम् इत्यर्थः यत् क्रौञ्चस्य अद्रेः रन्ध्रम् अस्ति तेन क्रौञ्चविलेन बलेः दैत्यस्य नियमने बन्धने अभ्युद्यतस्य प्रवृत्तस्य विष्णोः व्यापकस्य त्रिविक्रमस्य श्यामः कृष्णवर्णः पादः इव तिर्यगायामेन क्षिप्रप्रवेशनार्थं तिरश्चीनदैर्घ्येण शोभते इति तथाविधः सन् उदीचीम् उत्तरां दिशम् अनुसरेः अनुगच्छ । पुरा किल भगवतो देवात् भूर्जटेः धनुरुपनिषदम् अधीयानेन भृगुनन्दनेन स्कन्दस्य मात्रा क्रौञ्चगिरिणम् अतिनिशितविशिखमुखेन हेलया सत्पिण्डभेदं भित्त्वा ततः क्रौञ्चभेदादेव सद्यः समुज्जृम्भिते

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥५९॥
उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य।
कस्मिन्नपि यदि किल कैलासकुक्षौ प्रणयिजनसखे
मुग्धा सिद्धयुवतिजनसंदर्शनोत्कैर्भवेयुः ॥ ५८ ॥

गत्वेति क्रौञ्चविलनिर्गमनानन्तरम् ऊर्ध्वं गत्वा दशमुखस्य रावणस्य भुजैः बाहुभिः उच्छ्वासिताः विश्लेषिताः प्रस्थानां सानूनां सन्धयः यस्य तस्य एतेन नयनकौतुकसद्भावः उक्तः; त्रिदशं परिमाणम् एषाम् अस्तीति त्रिदशाः (संख्यायाश्चेत्यादिना बहुव्रीहिः। बहुव्रीहौ संख्याये डजित्यादिना समासान्तो डच् प्रत्ययः।)त्रिदशानां देवानां वनिताः तासां दर्पणस्य (कैलासस्य स्फटिकत्वात् रजतत्वाद्वा विम्बग्राहित्वेन इदमुक्तम्।) कैलासस्य अतिथिः स्याः यः कैलासः कुमुदविशदैः निर्मलैः शृङ्गाणाम् उच्छ्रायैः औन्नत्यैः खम् आकाशं वितत्य व्याप्य प्रतिदिनं दिने दिने राशीभूतः त्र्यम्बकस्य त्रिलोचनस्य अट्टहासः अतिहासः इव स्थितः। अट्टावतिशयचौमाविति यादवः। धावल्यात् हासत्वेन उत्प्रेक्षा। हासादीनां धावल्यं कविसमयसिद्धम् ॥ ५९ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शोभामद्रेः स्निग्धमृदितं यद्वदञ्जनं कज्जलं तस्य आभा इव आभा यस्य तस्मिन् त्वयि तटगते सानुगते सति मद्यः क्षतस्य क्षिप्तस्य हिरदस्य गजदन्तस्य छेदवत् गौरस्य धवलस्य तस्य अद्रेः कैलासस्य मेचके श्यामले (क्षणनीलासितश्यामकालश्यामलमेचका इत्यमरः।) वाससि वस्त्रे अंसन्यस्ते सति हलभृतो बलभद्रस्य इव स्निग्धिताभ्यां नयनाभ्यां प्रेक्षणीयां शोभां भक्तिं भाविनीम् उत्पश्यामि शोभा भविष्यतीति तर्कयामि इत्यर्थः। शौती पूर्णोपमा अलङ्कारः॥ ६०॥

हित्वेति। तस्मिन् क्रीडाशैले कैलासे (कैलासः कनकाद्रिश्च सन्दरो गन्धमादनः। क्रीडार्थं निर्मिताः शम्भोर्दैवैः क्रीडाद्र्योऽभवन्निति शम्भुरहस्ये। शम्भुना शिवेन भुजग एव वलयः कङ्कणं हित्वा गौर्याः भीरुत्वात् त्यक्ता दत्तहस्ता सती गौरी पादचारेण विचरेत् यदि तर्हि अग्रयायी पुरोगतः तथा स्निग्धितो घनीभावं प्रापितः अन्तर्जलस्य ओघः प्रवाहो यस्य स तथाभूतः भङ्गीनां

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे धर्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥६२॥
हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य ।

पर्वणां भङ्ग्या रचनया विरचितवपुः कल्पितशरीरः सन् मणीनां तटं मणितटं तस्य आरोहणाय सोपानत्वं कुरु सोपानभावं भज इत्यर्थः ॥ ६१ ॥

तत्रेति । तत्र कैलासे अवश्यं सर्वथा सुरयुवतयः वलय-कुलिशानि कङ्कणकोटयः (शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते ।) तैः उद्घट्टनानि प्रहाराः तैः उद्गीर्णम् उत्सृष्टं तोयं येन तं त्वां यन्त्रेषु धाराः यन्त्रधाराः तासां गृहत्वं क्षत्रिमधाराग्रहत्वं नेष्यन्ति प्रापयिष्यन्ति हे सखे मित्र धर्मे निदाघे लब्धस्य (धर्मलब्धत्वञ्चास्य देवभूमिषु सर्वदा सर्वर्तुसमाहारात् प्राथमिकमेघत्वाद्वा यथोक्तम् आषाढस्य प्रथमेति । तव ताभ्यः सुरयुवतिभ्यः मोक्षो न स्यात् यदि तदा क्रीडालोलाः क्रीडासक्ताः प्रमत्ताः इत्यर्थः ताः सुरयुवतीः श्रवणपरुषैः कर्णकटुभिः गर्जितैः करणैः भाययेः त्रासयेः । अत्र हेतुभयाभावात् (आत्मनेपदं युगारामश्च न)॥ ६२ ॥

हेमेति । हे जलद हेमाम्भोजानां प्रसवि जनकम्

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

धुन्वन् कल्पद्रुमकिशलायन्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम् ॥६३॥
तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।

(जिदृक्षोत्यादिना इनिप्रत्ययः ।) मानसस्य सरसः सलिलम् आददानः पिपन् इत्यर्थः तथा ऐरावतस्य इन्द्रगजस्य कामचारित्वाद्वा शिवेच्छार्थम् इन्द्रागमनाद्वा समागतस्य इति भावः त्वयि जलदानकाले सुखे सति न या प्रीतिः तां कुर्वन् तथा कल्पद्रुणां किशलयानि पल्लवभूतानि अंशुकानि सूक्ष्मवस्त्राणि इव (अंशुकं वस्त्रमात्रे स्यात् परिधानोत्तरीययोः । सूक्ष्मवस्त्रे नातिदीर्घावितिशब्दार्णवे ।) वातैः मेघवातैः धुन्वन् नाना बहुविधाः चेष्टाः नीयपानादयो येषु तैः ललितैः क्रीडितैः (ना भावभेदे स्त्रीलृत्वे ललितं त्रिषु सुन्दरे । अस्त्रियां प्रमदागारे क्रीडिते जातपल्लवे इति शब्दार्णवे ।) तं नगेन्द्रं कैलासं कामं यथेष्टं निर्विशेः समुपभुङ्क्ष्व (निर्वेशो भूतिभोगयोरित्यमरः ।) यथेच्छविहारो मित्रभूतेषु मैत्रयाः फलं सहजमिच्छन्ति ते कैलासः मेघपर्वतयोः अब्जसूर्ययोः अब्धिचन्द्रयोः शिखिजीमूतयोः समीराग्न्योः मित्रता स्वयम् इति भावः ॥ ६३ ॥

तस्येति । प्रणयिनः प्रियतमस्य इव तस्य कैलासस्य

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥६४॥

उत्सङ्गे ऊर्द्धभागे (उत्सङ्गो मुखसंयोगे सक्थन्यूर्द्धतलेऽपि चेति मालतीमालायाम्।) गङ्गा दुकूलं शुभ्रवस्त्रम् इव (उपमितसमासः। दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके इति शब्दार्णवे।) अन्यत्र तु गङ्गा इव दुकूलं तत् स्रस्तं यस्याः तां तथोक्ताम् अलकां कुबेरनगरीं दृष्ट्वा कामिनीम् इवेति शेषः हे कामचारिन् त्वं पुनः त्वं तु न ज्ञास्यसे इति न किन्तु ज्ञास्यसे एव इत्यर्थः (कामचारिणस्ते पूर्वमपि बहुशत्वो दर्शनसम्भवादज्ञानमसम्भावितमेवेति निश्चयार्थं नञ्द्वयप्रयोगः तदुक्तं स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोग इति। उच्चैर्विमानानि उन्नतानि सप्तभूमिक भवनानि (विमानोऽस्त्री देवयाने सप्तभूमौ च सन्नौतियादवः।) तानि यस्यां सा (मेघसंवाहनस्थानसूचनार्थम् इदं विशेषणम्।) अन्यत्र विमाना निष्कोपाया अलका वो युष्माकं काले मेघकाले इत्यर्थः (कालस्य सर्वमेघसाधारण्यात् वः इति बहुवचनम्।) सलिलम् उद्गिरतीति सलिलोद्गारं स्रवत्सलिलधारम् इत्यर्थः अभ्रवृन्दं मेघकदम्बकं कामिनी स्त्री मुक्ताजालैः मौक्तिकसरैः ग्रथितं ग्रन्थयुक्तम् (पुंस्त्र्यां मौक्तिके मुक्तेति यादवः।) अलकम् इव चूर्णकुन्तलानि इव (जातावेकवचनम्। अलकाश्चूर्णकुन्तला इत्यमरः।) वहति बिभर्त्ति। अत्र कैलासस्य

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

मेघदूतम्।

उत्तरमेघः।

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥१॥

अनुकूलनायकत्वम् अलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं ध्वन्यते एकायत्तोऽनुकूलः स्यादिति प्रियोपलालिता नित्यं स्वाधीनपतिका मतेति च लक्षयन्ति उदाहरन्ति च लालयन्नलकप्रान्तात् रचयन् पत्रमञ्जरीम्। एकां विनोदयन् कान्तां छायावदनुवर्त्तते इति ॥ ६३ ॥

इति श्रीकोलाचलमहोपाध्यायमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीवन्यां पूर्वमेघः।

विद्युत्वन्तमिति। यत्र अलकायां ललिताः रम्याः वनिताः स्त्रियो येषु ते सह चित्रैः वर्त्तन्ते इति सचित्राः (चित्रेख्याश्चर्य्ययोश्चित्रमित्यमरः। तेन सहेति तुल्ययोग इति बहुव्रीहिः। वोपसर्जनस्येति सहशब्दस्य समासः।)

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।

सङ्गीताय तौर्यत्रिकाय । प्रहतमुरजाः ताडितमृदङ्गाः (मुरजा तु मृदङ्गे स्यात् ढक्कामुरजयोरपीति शब्दार्णवे ।) मणिमय्यः मणिविकाराः भुवो येषु अभ्रं लिहन्तीति अभ्रंलिहानि अभ्रङ्लषाणि (वहाभ्रे लिह इति खश्-प्रत्ययः । अरुर्द्विषेत्यादिना मुमागमः) अग्राणि शिखराणि येषां ते तथोक्ताः अतितुङ्गाः इत्यर्थः प्रासादाः देवगृहाणि (प्रासादो देवभूभुजामित्यमरः ।) विद्युतः अस्य सन्तीति विद्युत्वन्तं सेन्द्रचापम् इन्द्रचापवन्तं स्निग्धः श्राव्यः गम्भीरः घोषः गर्जितं यस्य तम् अन्तः अन्तर्गतं तोयं यस्य तं तुङ्गम् उन्नतं त्वां तैः तैः विशेषैः ललितवनितत्वादिधर्मैः तुलयितुं समीकर्त्तुम् अलं पर्य्याप्ताः । अलं भूषणपर्य्याप्तिशक्तिवारणवाचकमित्यमरः । अत्र उपमानोपमेयभूतमेघप्रासादधर्म्माणां विद्युद्धनितादीनां यथासंख्यमन्योन्यसादृश्यात् मेघप्रासादसादृश्यसिद्धिरिति बिम्बप्रतिबिम्बभावेनेयं पूर्णोपमा ॥ १ ॥

सम्प्रति सर्वदा सर्वर्त्तुसम्पत्तिमाह हस्ते इति । यत्र अलकायां बधूनां स्त्रीणां हस्ते लीलार्थं कमलं लीलाकमलम् (शरत्पिङ्गमेतत् तदुक्तं शरत् पङ्कजलक्षणेति ।) अलके कुन्तले जातावेकवचनम् अलकेषु इत्यर्थः बालकुन्दैः प्रत्यग्रमाध्यकुसुमैः अनुविद्धम् अनुवेधः ग्रन्थनम् नपुंसके भावे

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं बधूनाम् ॥२॥

क्तः। यद्यपि कुन्दानां शैशिरत्वम् अस्ति माघं कुन्दमित्यभिधानात् तथापि हेमन्ते प्रादुर्भावः शिशिरे प्रौढत्वमिति व्यवस्थाभेदेन हेमन्तकार्य्यत्वमित्याशयेन बालविशेषणम्। अलकमिति प्रथमान्तपाठे समसौप्रक्रमभङ्गः स्यात्। नाथस्तु नियतपुंलिङ्गताहानिश्चेति दोषान्तरमाह तदसत् स्वभाववक्राण्यलकानि तासाम् निर्धूतान्यलकानि पातितमुरः क्षतस्रोऽधरः खण्डित इत्यादिषु प्रयोगेषु नपुंसकलिङ्गतादर्शनादिति।) आनने मुखे लोध्रप्रसवानां लोध्रपुष्पाणां शैशिराणां रजसा परागेण (स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने इत्यमरः।) पाण्डुतां नीता यौः शोभा चूडापाशे नवकुरवकं वासन्तः पुष्पविशेषः कर्णे चारु पेशलं शिरीषं शैषः पुष्पविशेषः सीमन्ते मस्तककेशवीथ्याम् (सीमन्तमस्त्रियां मस्तकेशवीथ्यामुदाहृतमिति शब्दार्णवे।) तव उपगमः मेघगम इत्यर्थः तत्र जातं त्वदुपगमजं वार्षिकम् इत्यर्थः नीपं कदम्बकुसुमम् सर्वत्र अस्तीति शेषः। अस्तिर्भवतिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति न्यायात्। इत्थं कमलकुन्दादि तत्तत्कार्य्यसमाहाराभिधानादर्थात् सर्वर्तुसमाहारसिद्धिः कारणं विना कार्य्यस्यासिद्धेरिति भावः॥ २॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

यत्रोन्मत्तभ्रमरमुखराः पाटला नित्यपुष्पा
हंसश्रेणीरचितरसना नित्यपद्मा नलिन्यः।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्या प्रदोषाः।३
आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात्।

यत्रेति। यत्र अलकायां पाटला इत्या नित्यानि पुष्पाणि येषां ते तथा न तु ऋतुनियमादिति भावः अतएवोन्मत्तैर्भ्रमरैर्मुखराः शब्दायमानाः। नलिन्यः पद्मिन्यो नित्यानि पद्मानि यासां तास्तथा ननु हैमन्त-वर्जितमित्यर्थः। अतएव हंसश्रेणीभीरचितरसना नित्यं हंसपरिवेष्टिता इत्यर्थः भवनशिखिनः क्रीडामयूरा नित्यं भास्वन्तः कलापा बर्हाणि येषां ते तथोक्ताः न तु वर्षा-स्वेव अतएव केकाभिरुत्कण्ठा उद्ग्रीवाः। प्रदोषाः रात्रयः नित्या ज्योत्स्ना यासां ताः न तु शुक्लपक्ष एव। अतएव प्रतिहता तमसां वृत्तिर्व्याप्तिर्यैषां ते च ते रम्याश्चेति तथोक्ताः॥ ३॥

आनन्दोत्थमिति। यत्रालकालकायां वित्तेशानां यक्षाणाम्। (वित्ताधिपः कुबेरः स्यात् प्रभौ धनिक यक्षयोरिति शब्दार्णवे)। आनन्दोत्थम् आनन्दजन्यमेव नय-नसलिलम् अन्यैर्निमित्तैः शोकादिभिर्न। इष्टसंयोगेन

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

नोद्यन्यस्मात् प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥४॥
यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।

प्रियजनसमागमेन साध्यान्निवर्त्तनीयान्नत्वप्रतीकार्य्यादित्यर्थः । कुसुमशरजान्मदनशरजादन्यस्तापो नास्ति । प्रणयकलहादन्यस्मात्कारणाद्विप्रयोगोपपत्तिर्विरहप्राप्तिरपि नास्ति । किञ्च यौवनादन्यत् वयो वार्द्धकं नास्ति । श्लोकार्द्धं प्रक्षिप्तम् ॥ ४ ॥

यस्यामिति । यस्याम् अलकायां यक्षाः देवयोनिविशेषाः उत्तमस्त्रीसहायाः ललिताङ्गनासहचराः सन्तः सितमणिमयानि स्फटिकमणिमयानि चन्द्रकान्तमयानि वा अत एव ज्योतिषां तारकाणां छायाः प्रतिबिम्बानि एव कुसुमानि तैः रचितानि परिष्कृतानि (ज्योतिश्छायाग्निभाज्वालाङ्कपुच्छार्थध्वराभास्विति वैजयन्ती ।) एतेन पानभूमेरस्थानशोभत्वमुक्तम् हर्म्यस्थलानि एत्य प्राप्य तद्ध्वनिः इव ध्वनिः येषां तेषु पुष्करेषु वाद्य भाण्डमुखेषु (पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले इत्यमरः ।) अनकैः मन्दम् आहतेषु सत्सु एतच्च नृत्यगीतवीरध्वनिलक्षणम् कल्पद्रुप्रसूतं कल्पद्रुतस्य काङ्क्षितार्थप्रदत्वात् मद्यमपि तत्र प्रसूतम् रतिः फलं यस्य तत् रतिफलाख्यं मधु मद्यम्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ५ ॥
मन्दाकिन्याः पयसि शिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढ़ैः
संक्रीड़न्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ६ ॥

आसेवन्ते आहृत्य पिबन्ति इत्यर्थः । तालचीरसिताशुता-
मलगुडोन्मत्तास्थिकालाहयादविन्द्रद्रुमसोरटेक्षुकदलीगुल्म-
प्रसूनैर्युतम् । इत्यक्षेन्द्रपुष्पभल्लातपचितं पुष्पद्रुमूलश्रुतं
छात्रेण स्मरदीपनं रतिफलाख्यं स्वादु शीतं (मधु इति मदि-
रार्णवे) ॥ ५ ॥

मन्दाकिन्या इति । यत्र अलकायाम् अमर प्रार्थिताः सुन्दर्य इत्यर्थः कन्याः यच्चकुमार्यः (कन्या कुमारि-कानार्य्योरिति विश्वः ।) मन्दाकिन्याः गङ्गायाः पयसि सलिले शिशिरैः शीतलैः मरुद्भिः सेव्यमानाः सत्यः तथा अनुतटं तटेषु रोहन्तीति अनुतटरुहः (क्विप्) तेषां मन्दाराणां छायया आतपेन वारितोष्णाः शमितातपाः सत्यः कनकस्य सिकतासु मुष्टिभिः निक्षेपेण गूढैः संवृतैः अत एव अन्वेष्टव्यैः सद्भिः मणिभिः रत्नैः संक्रीडन्ते सुख-मधिसंज्ञया दैशिकक्रीडया सम्यक् क्रीडन्ति इत्यर्थः ।

क्षौमं क्षान्तिसंपरिभ्यसेत्याक्षनेपदम् । रत्नादिभिर्वालुकादौ

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिर्लुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः॥७॥

गुप्तैर्दृष्टव्यकर्मभिः । कुमारीभिः कृता क्रीडा नाम्ना गुप्तमणिः स्मृता । (रासक्रीडा गूढमणिर्गुप्तकेलिकुलायनम् । पिण्डकन्दुकदण्डाद्यैः स्मृता देशिककैलय इति शब्दार्णवे) ॥ ६ ॥

नीवीति । यत्र अलकायाम् अनिभृतकरेषु चपलहस्तेषु प्रियेषु नीवी वसनग्रन्थिः (नीवी परिषणे ग्रन्थौ स्त्रीणां जघनवाससीति विश्वः । (नीवी एव बन्धः नीवीबन्धः) चूतप्रवदपौनरुक्त्यम् ।) तस्य उच्छ्वसितेन त्रुटितेन शिथिलं क्षौमं दुकूलं रागात् आक्षिपत्सु आहरत्सु सत्सु ह्रीमूढानां लज्जाविधुराणां बिम्बं बिम्बिकाफलम्)बिम्बं फलं बिम्बिकायाः प्रतिबिम्बे च मण्डले इति विश्वः । (बिम्बम् इव अधरो यासां तासां बिम्बाधराणां स्त्रीविशेषाणाम्) विशेषाः कामिनो कान्ता भीरुबिम्बाधराङ्गनेति शब्दार्णवे ।) चूर्णस्य कुङ्कुमादेः मुष्टिः अर्चिर्भिः मयूखैः तुङ्गान्) अर्चिर्मयूख शिखयोरिति विश्वः ।) रत्नानि एव प्रदीपान् अभिमुखं यथा तथा प्राप्य अपि विफलप्रेरणा दीपनिर्वाणाचमत्कारात् निष्फला भवति । अत्र अङ्गनानां रत्नप्रदीपनिर्वाणग्रहत्वा मौग्ध्यं व्यज्यते ॥ ७ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जाले-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ८॥

नेत्रेति । हे मेघ नेत्रा प्रेरकेण सततगतिना सदागतिना वायुना (मातरिश्वा सदागतिरित्यमरः ।) यद्विमानाग्रभूमीः यस्याः अलकायाः विमानानां सप्तभूमिकभवनानाम् अग्रभूमीः उपरिभूमिकाः नीताः प्रापिताः त्वामिव पश्यन्ति इति त्वादृशाः त्वत्सदृश्याः इत्यर्थः (त्वदादिषु दृशोऽनालोचनेकञ्चेति कञ्प्रत्ययः ।) जलमुचः मेघाः आलेख्यानां सचित्राणाम् (चित्रं लिखितरूपाढ्यं स्यादालेख्यन्तु यद्वत इति शब्दार्णवे ।) सलिलकणिकाभिः जलकणैः दोषं स्फोटनम् उत्पाद्य सद्यः शङ्कास्पृष्टाः इव सापराधत्वात् भयाविष्टाः इव (शङ्का वितर्कभययोरिति शब्दार्णवे ।) धूमोद्गारस्य धूमनिर्गमस्य अनुकृतौ अनुकरणे निपुणाः कुशलाः जर्जराः विशीर्णाः सन्तः जालमार्गैः गवाक्षरन्ध्रैः निष्पतन्ति निष्क्रामन्ति । यथा केनचित् अन्तःपुरसञ्चारवता दूतेन गूढवृत्त्या रहस्यभूमिं प्रापिताः तत्र स्त्रीणां व्यभिचारदोषम् उत्पाद्य सद्यः साशङ्काः क्षुभितेगान्तराः जाराः जालमार्गैर्निष्क्रामन्ति तद्वदिति ध्वनिः । प्रकृतार्थे शङ्कास्पृष्टा इवेत्युत्प्रेक्षा ॥ ८ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

यत्र स्त्रीणां प्रियतममुजाश्लिङ्गनोच्छ्वासितानां
अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ९ ॥
अन्यर्थ्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धम् ।

यत्रेति । यत्र अलकायां निशीथे अर्द्धरात्रे (अर्द्धरात्रनिशीथौ द्वावित्यमरः ।) त्वत्संरोधस्य मेघावरणस्य अपगमेन विशदैः निर्मलैः चन्द्रपादैः चन्द्ररोचिभिः (पादा रश्म्यङ्घ्रितुर्यांशा इत्यमरः ।) स्फुटजललवस्यन्दिनः उल्वणास्रुकणस्राविणः तन्तुजालावलम्बाः वितानलम्बिसूत्रपुञ्जाधाराः तद्गुणयुक्ताः इत्यर्थः । चन्द्रकान्ताः चन्द्रकान्तमणयः प्रियतमानां भुजैः उच्छ्वासितानि आत्मा जलसेकाय वा शिथिलितानि आलिङ्गनानि यासां तासां स्त्रीणां सुरतजनिताम् अङ्गग्लानिम् अवयवानां ग्लानतां व्यालुम्पन्ति अपनुदन्ति ॥ ९ ॥

अन्यर्थ्येति । यत्र अलकायां नेतुं शक्याः अन्याः (अन्यजन्यौ शक्यार्थे इति निपातः ततो नञ्समासः ।) भवनानाम् अन्तः अन्तर्भवनम् (अव्ययं विभक्तीत्यादिना अव्ययीभावः ।) अन्तर्भवने निधयो येषां ते तथोक्ताः (यथेच्छभोगसम्भावनार्थमिदं विशेषणम्) विबुध

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वैभ्राजाख्यं विबुधवनितावारमुख्यासहायाः
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥१०॥
गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।

वनिताः अप्सरसः ता एव वारमुख्याः वेश्याः ता एव सहायाः येषां ते तथोक्ताः (वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः । सत्कृता वारमुख्या स्यादित्यमरः ।) बद्धालापाः सम्भावितसंलापाः कामिनः कामुकाः प्रत्यहम् अहनि अहनि (अव्ययं विभक्तीत्यादिना समासः)। रक्ताः मधुराः कण्ठाः कण्ठध्वनिः येषां ते तैः सुन्दरकण्ठध्वनिभिः धनपतियशः कुबेरकीर्त्तिम् उद्गायद्भिः उच्चैर्गायद्भिः देवगानस्य गान्धारग्रामत्वात् तारतरं गायद्भिः इत्यर्थः किन्नरैः सार्द्धं सह विभ्राजस्य इदं वैभ्राजं वैभ्राजम् इति आख्या यस्य तत् वैभ्राजाख्यम् (विभ्राजेन गणेशेन त्रातं वैभ्राजसाख्येति शब्दरत्ने ।) चैत्ररथस्य नामान्तरमेतत् बहिरुपवनं बाह्योद्यानं निर्विशन्ति अनुभवन्ति ॥ १० ॥

गत्युत्कम्पादिति । यत्र अलकायां कामिनीनाम् अभिसारिकाणां निशि भवः नैशः मार्गः सवितुः उदये सति गत्वा गमनेन उत्कम्पः स्खलनं तस्मात् हेतोः अलकेभ्यः पतितैः मन्दारपुष्पैः सुरतकुसुमैः तथा पत्राणां पंक्तीनां छेदैः खण्डैः पतितैः इति शेषः तथा कर्णैः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मुक्ताजालैस्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥११॥
मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्याम् ।

विभ्रंशन्ति द्यूति कर्णविस्रंशीनि तैः कनकस्य कमलैः (षष्ठ्या विवक्षितार्थलाभे सति मयटा विग्रहे अध्याहारदोषः एवमन्यत्राप्यनुसन्धेयम् ।) तथा मुक्ताजालैः मौक्तिकसरैः शिरोनिहितैः इत्यर्थः तथा स्तनयोः परिसरः प्रदेशः तत्र छिन्नानि सूत्राणि येषां तैः हारैश्च सूच्यते ज्ञाप्यते मार्गपतितमन्दारकुसुमादिसिद्धैः अयमभिसारिकाणां पन्थाः इत्यनुमीयते इत्यर्थः ॥ ११ ॥

मत्वेति । यत्र अलकायां मन्मथः कामः धनपतेः कुबेरस्य सखा धनपतिसखः (राजाहः सखिभ्यष्टच् ।) तं देवं महादेवं साक्षात् वसन्तं सखिस्नेहात् निजरूपेण वसन्तं वर्त्तमानं मत्वा ज्ञात्वा भयात् भालेक्षणभयात् षट्पदाः एव ज्या मौर्वी यस्य तं चापं प्रायः प्रायुर्थेण न वहति न बिभर्त्ति । कथं तर्हि तस्य कार्यसिद्धिः अत आह सभ्रूभङ्गेति तस्य मन्मथस्य आरभ्यः कामिजनविजयव्यापारः सभ्रूभङ्गं प्रहितानि प्रयुक्तानि नयनानि दृष्टयो येषु तैः तथोक्तैः कामिनः एव लक्ष्याणि तेषु अमोघैः सफलप्रयोगैः इत्यर्थः मन्मथचापोऽपि क्वचि-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥१२॥
वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यञ्च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥१३॥

दपि मोघः स्यादिति भावः चतुराश्च ताः वनिताश्च तासां विभ्रमैः विलासैः एव सिद्धः निष्पन्नः । यत् अनर्थकरं पात्तिकफलञ्च तत्प्रयोगादरं निश्चितसाधनप्रयोगइति भावः ॥ १२ ॥

कचधार्य्यं देहधार्य्यं परिधेयं विलेपनम् । चतुर्द्धा भूषणं प्राहुः स्त्रीणामन्यच्च दैशिकमिति रसाकरे तदेतदाह वास इति । यस्याम् अलकायां चित्रं नानावर्णं वासः वसनं परिधेयमण्डनमेतत् नयनयोः विभ्रमाणाम् आदेशे उपदेशे दक्षम् अनेन विभ्रमहारा मधुनो मण्डनत्वमनुसन्धेयं तच्च मण्डनादिवत् देहधार्य्येऽन्तर्भाव्यं मधु मद्यं किसलयैः पल्लवैः सह पुष्पोद्भेदम् उभयञ्चेत्यर्थः इदं तु कचधार्य्यं भूषणानां विकल्पान् विशेषान् देहधार्य्यमेतत् तथा चरणकमलयोः न्यासस्य समर्पणस्य योग्यं रज्यते अनेन इति रागः रञ्जकद्रव्यं लाक्षा एव रागः तं लाक्षारागम् इदञ्च अङ्गरागादिविलेपनमण्डनोपलक्षणं सकलं

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ १४ ॥

सर्वं चतुर्विधम् अपि इत्यर्थः अबलामण्डनं योषित्प्रसाधनजातम् एकः कल्पवृक्षः एव सूते जनयति न तु नानासाधनसम्पादनप्रयास इत्यर्थः ॥ १३ ॥

इत्यलकां वर्णयित्वा तत्र स्वभवनस्य अभिज्ञानमाह तत्रेति । तत्र अलकायां धनपतिगृहान् कुबेरगृहान् उत्तरेण उत्तरस्मिन् अदूरदेशे (एनबन्यतरस्यामदूरेऽपञ्चम्या इत्येनप्रत्ययः । एनपा द्वितीयेति द्वितीया । गृहाः पुंसि च भूम्न्येव इत्यमरः ।) अस्माकम् इदम् अस्मदीयम् (वृद्धाच्छ इति छप्रत्ययः ।) आगारं गृहं सुरपतिधनुश्चारुणा मणिमयत्वात् अभ्रङ्कषत्वाच्च इन्द्रचापसुन्दरेण तोरणेन बहिर्द्वारेण दूरात् लक्ष्यं दृश्यम् अनेन अभिज्ञानेन दूरतएव ज्ञातुं शक्यम् इत्यर्थः अभिज्ञानान्तरमाह यस्य आगारस्य उपान्ते प्राकारान्तः पार्श्वदेशे मे मम कान्तया वर्धितः पोषितः कृतकतनयः कृत्रिमसुतः पुत्रत्वेन अभिमन्यमान इत्यर्थः हस्तप्राप्यैः हस्तावचेयैः स्तवकैः गुच्छैः नमितः (स्यादगुच्छकस्तु स्तवक इत्यमरः ।) बालो मन्दारवृक्षः कल्पवृक्षः अस्ति इति शेषः ॥ १४ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसा॥१५
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः।

इतः पञ्चभिः श्लोकैरभिज्ञानान्तरमाह वापीति। अस्मिन् मदीयागारे मरकतशिलाभिः बद्धः सोपानमार्गः यस्याः सा तथोक्ता विदूरेभवाः वैदूर्याः (विदूराज् ञ इति ञप्रत्ययः।) वैदूर्याणाम् विकाराः वैदूर्याणि (विकारार्थे अन्प्रत्ययः।) स्निग्धानि वैदूर्याणि नालानि येषां तैः हैमैः सौवर्णैः विकचकमलैः छन्ना वापी च अस्ति इति शेषः यस्याः वाप्याः तोये कृतवसतयः कृतनिवासाः हंसाः त्वां मेघं प्रेक्ष्य अपि व्यपगतशुचः वर्षाकालेऽपि व्यपगतकलुष जलत्वात् वीतदुःखाः सन्तः सन्निकृष्टं सन्निहितं सुगमम् अपि इत्यर्थः मानसं मानससरः न आध्यास्यन्ति न उत्कण्ठिष्यन्ति। आध्यानमुत्कण्ठास्मरणमिति काशिकायाम्॥ १५॥

तस्या इति। तस्याः वाप्याः तीरे पेशलैः चारुभिः (चारौ दक्षे च पेशल इत्यमरः।) इन्द्रनीलैः रचितशिखरः इन्द्रनीलमणिमयशिखर इत्यर्थः कनककदलीनां

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि॥१६॥
रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य ।

वेष्टनेन परिधिना प्रेक्षणीयः दर्शनीयः क्रीडाशैलः अस्ति इति शेषः हे सखे उपान्तेषु प्रान्तेषु स्फुरिताः तडितः यस्य तं तथोक्तम् इदं विशेषणं कदलीसाम्यार्थमुक्तम् इन्द्रनीलसाम्यं तु मेघस्य स्वाभाविकम् इत्यनेन सूच्यते त्वां प्रेक्ष्य मद्गेहिन्याः प्रियः इति हेतोः तस्य शैलस्य मद्गृहिणीप्रियत्वात् हेतोः इत्यर्थः कातरेण भीतेन चेतसा (भयञ्चात्र सानन्दमेव वस्तूनामनुभूतानां तुल्यवर्णदर्शनात् । श्रवणात् कीर्त्तनाद्वापि सानन्दा भीर्यथा भवेदिति रसाकरे दर्शनात् ।) तम् एव क्रीडाशैलम् एव स्मरामि एवकारो विषयान्तरव्यवच्छेदार्थः सदृशवस्त्वनुभवात् इष्टार्थस्मृतिर्जायते इत्यर्थः । अत एवात्र स्मरणाख्योऽलङ्कारः तदुक्तं सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते इति । निरुक्तकारस्तु त्वां तमेव स्मरामीति योजयित्वा मेघे शैलत्वारोपमाचष्टे तदसङ्गतम् अद्रेराकारारोपस्य पुरोवर्त्तित्वानुभवाक्कत्वेन स्मरतिशब्दप्रयोगायोगात् शैलत्वभावना स्मृतिरित्यपि नोपपद्यते भावनायाः स्मृतित्वे प्रमाणाभावात् अनुभवायोगात् सादृश्योपन्यास वैयर्थ्याच्च विसदृशेऽपि शालग्रामे हरिभावनादर्शनादिति ॥ १६ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः१७

रक्तेति । अत्र क्रीडाशैले कुरबकाः एव द्रुतिः आवरणं यस्य तस्य मधौ वसन्ते भवाः माधव्यः तासां मण्डपः तस्य अतिमुक्तलताग्रहस्य (अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलतेत्यमरः ।) प्रत्यासन्नौ सन्निकृष्टौ चलकिसलयः चञ्चलपल्लवः अनेन वृक्षस्य पादताडनेषु प्राञ्जलित्वं व्यज्यते रक्ताशोकः (रक्तविशेषणं तस्य सरोद्दीपकत्वादुक्तं प्रसूनकैरशोकस्तु श्वेतो रक्त इति द्विधा । बहुसिद्धिकरः श्वेतो रक्तोऽत्र स्मरवर्धन इत्यशोककल्पे दर्शनात् ।) कान्तः कमनीयः केसरः वकुलश्च (अथ केसरे वकुल इत्यमरः ।) स्त्र इति शेषः । एकः तयोरन्यतरः प्रायसिकत्वादशोक इत्यर्थः मया सह तव सख्याः स्वप्रियाया इत्यर्थः वामपादाभिलाषी दोहदच्छद्मनेति अत्रापि सम्बन्धनीयं स च अहं च अभिलषाव इत्यर्थः अन्यः केसरः दोहदं द्रुमादीनां प्रसवकारणं संस्कारद्रव्यम् (तरुगुल्मलतादीनामकाले कुसुमैः कृतम् । पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रियेति शब्दार्णवे ।) तस्य छद्मना व्याजेन (कपटोऽस्त्री व्याजदम्भोपधयश्छद्म कैतवे इत्यमरः ।) अस्याः तव सख्याः वदनमदिरां गण्डूषमद्यं काङ्क्षति मया सहेति अत्रापि सम्बन्धनीयम् । अशोकवकुलयोः स्त्रीपादताडनगण्डूष मदिरे दोहदमिति प्रसिद्धिः । स्त्रीणां स्पर्शात् प्रियङ्गुर्वि-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
मूले बद्धा मणिभिरनतिप्रौढ़वंशप्रकाशैः।
तालैः शिञ्जावलयसुभगैर्नर्त्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ १८॥

कसति वकुलः शीधुगण्डूषसेकात् पादाघातादशोक-
स्तिलककुरवको वीक्षणालिङ्गनाभ्याम्। मन्दारो नर्म-
वाक्यात् पटुमृदुहसनाच्चम्पको वक्त्रवाताच्चूतो गीताद्भवेद्
विकसति च पुरो नर्त्तनात् कर्णिकारः ॥ १७ ॥

तन्मध्ये इति। किञ्चेति चार्थः तन्मध्ये तयोर्हर्म्यतलयोर्मध्ये अनति प्रौढानाम् अनति कठोराणां वंशानां प्रकाश इव प्रकाशो येषां तैः तरुणवेणुसच्छायैः मणिभिः मरकत-शिलाभिः मूले बद्धा कृतवेदिकेत्यर्थः स्फटिकं स्फटिकमयं फलकं पीठं यस्याः सा काञ्चनस्य विकारः काञ्चनी सौवर्णी वासयष्टिः निवासदण्डः अस्तीति शेषः शिञ्जा भूषणध्वनिः (भूषणानान्तु शिञ्जितमित्यमरः। भिदादित्वाद् ङ्। शिञ्जिधातुरयं तालव्यादिः न तु दन्त्यादिः।) शिञ्जाप्रधानानि वलयानि तैः सुभगाः रम्याः तैः तालैः करतलवादनैः मे मम कान्तया नर्त्तितः वो युष्माकं सुहृत् सखा नीलकण्ठः मयूरः (मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुगित्यमरः।) दिवसविगमे सायंकाले यां यष्टि-काम् अध्यास्ते यष्ट्याम् आस्ते इत्यर्थः (अधियौङ्ग्यासां

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथाः
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
श्यामच्छायं भवनमधुनामद्वियोगेन नूनं
सूर्य्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ।१९

कर्म्मेति कर्म्मत्वात् द्वितीया ।) तत्रागारमित्यारभ्य पञ्चसु श्लोकेषु सप्तदशवस्तुवर्णनादुदात्तालङ्कारः तदुक्तं तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते इति ॥ १८ ॥

एभिरिति । हे साधो निपुण (साधुः समर्थो निपुणो वेति काशिकायाम् ।) हृदयनिहितैः अविस्मृतैरित्यर्थः एभिः पूर्वैर्लक्षणैः तोरणादिभिरभिज्ञानैः द्वारोपान्ते एकवचनमविवक्षितं द्वारपार्श्वयोरित्यर्थः; लिखिते वपुषी आकृती ययोः तौ तथोक्तौ शङ्खपद्मौ नाम निधिविशेषौ (निधिर्नौ शेवधिर्भेदाः पद्मशङ्खादयो निधेरित्यमरः ।) दृष्ट्वा च नूनं सत्यं अधुना इदानीम् (अधुनेति निपातः ।) मद्वियोगेन मम प्रवासेन श्यामच्छायम् उत्तरोपरमात् क्षीणकान्ति भवनं मद्गृहं लक्षयेथाः निश्चिनुयाः; तथाहि सूर्य्यापाये सति कमलं पद्मं स्वाम् आत्मीयाम् अभिख्यां शोभाम् (अभिख्या नामशोभयोरित्यमरः ।) न पुष्यति न उपचिनोति खलु सूर्य्यविरहितं पद्ममिव पतिविरहितं गृहं न शोभते इत्यर्थः ॥ १९ ॥

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पात्मभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥२०
तन्वीश्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी-
मध्येक्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।

(निजगृहनिश्चयानन्तरकृत्यमाह गत्वेति । हे मेघ शीघ्रसम्पात) एव हेतुः तस्य शीघ्रप्रवेशार्थमित्यर्थः (षष्ठी हेतुप्रयोगे इति षष्ठी । सम्पातः पतने वेगे प्रवेशे वेदसंविदे इति शब्दार्णवे ।) सद्यः सपदि कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावः ताम् अल्पशरीरतां गत्वा प्राप्य प्रथमकथिते तस्यास्तीरे इत्यादिना पूर्वोद्दिष्टे रम्यसानौ निषदनयोग्ये इत्यर्थः क्रीडाशैले निषण्णः उपविष्टः सन् अल्पात्मा अल्पप्रकारं भाः प्रकाशो यस्याः ताम् (प्रकारे गुणवचनस्येति हिरुक्तिः ।) खद्योतानाम् आली तस्या विलसितेन स्फुरितेन निभां समानां विद्युदुन्मेषः विद्युत्प्रकाशः स एव दृष्टिः ताम् भवनस्यान्तः अन्तर्भवनं तत्र पतितां प्रविष्टां कर्तुम् अर्हसि यथा कश्चित् किञ्चिदन्तिष्ठन् क्वचिदुन्नते स्थित्वा शनैः शनैरतितरां द्राघीयसीं दृष्टिमिष्टदेशे पातयति तद्वदित्यर्थः ॥ २० ॥

सम्प्रति दृष्टिपातं कृतवतोऽस्याभिज्ञानं श्लोकद्वयेनाह

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्रोणीभाराद्अलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः॥२१॥

तन्वीति। तन्वी कृशाङ्गी नतु पीवरी (अल्पं दभ्रं कृशं तनु इत्यमरः। वोतो गुणवचनादिति ङीष्।) श्यामा युवतिः (श्यामा यौवनमध्यस्था द्युत्पल्लमालायाम्।) शिखरिणि एषां सन्तीति शिखरिणः कोटिमन्तः (शिखरं शैलवृक्षाग्रकक्षापुलककोटिष्विति विश्वः।) शिखरिणः दशनाः दन्ताः यस्याः सा एतेनास्या भाग्यवत्त्वं पत्यायुष्करत्वञ्च सूच्यते (तदुक्तं सामुद्रिके स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः। दन्ता भवन्ति यासां तासां पतिः जगत् सर्वम्। ताम्बूलरक्तरक्तेऽपि स्फुटभासः समोदयाः। यस्याः शिखरिणो दन्ता दीर्घं जीवति तत्पतिरिति। पक्वं परिणतं विम्बं बिम्बिकाफलमिव अधरोष्ठो यस्याः सा पक्वविम्बाधरोष्ठी (आकपार्थिवादित्वान्मध्यपदलोपी समास इति वामनः। नासिकोदरोष्ठेत्यादिना ङीष्।) मध्ये श्यामा कृशोदरीत्यर्थः चकितहरिणाः प्रेक्षणा-नीव प्रेक्षणानि दृष्टयो यस्याः सा तथोक्ता एतेनास्याः पद्मिनीत्वं व्यज्यते (तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे चकितमृगदृश्यामे प्रान्तरक्ते च नेत्रे इति।) निम्ननाभिः गम्भीरनाभि अनेन नारीणां नाभिगाम्भीर्यान्मदनातिरेक इति कामसूत्रार्थः सूच्यते श्रोणीभारात् अलसगमना मन्द-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्

गामिनौ नतु जघनदोषात् स्तनाभ्यां स्तोकनम्रा ईषद्-वनता न तु वपुर्दोषात् युवतय एव विषयः तस्मिन् युवति-विषये युवतीरधिकृत्येत्यर्थः धातुः ब्राह्मणः आद्या सृष्टिः प्रथमशिल्पमिव स्त्रितेत्युक्तेश्चा प्रथमनिर्मिता युवतिरियमे-वेत्यर्थः प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशात् शिल्पनिर्माणसौष्ठवं दृश्यते इत्याद्यविशेषणं तथाच अस्मिन् प्रपञ्चे न कुत्राप्येवंविधरामणीयकं रमणीरत्नमस्तीति भावः तदेवभूता या स्त्री तत्रान्तर्भवने स्यात् तत्र निवसे-दित्यर्थः तामित्युत्तरश्लोकेन सम्बन्धः॥ २१॥

तामिति। सहचरे सहचारिणि अनेन वियोगासहि-ष्णुत्वं व्यज्यते मयि दूरीभूते दूरस्थिते सति सहचरे चक्र-वाके दूरीभूते सति चक्रवाकीं चक्रवाकवधूमिव (जाते-रस्त्रीविषयादयोपधादिति ङीष्।) परिमितकथां मित-भाषिणीम् एकाम् एकाकिनीं स्थितां ताम् अन्तर्भवनगतां मे द्वितीयं जीवितं जानीथाः जीविततुल्यां मत्प्रेयसीमव-गच्छेरित्यर्थः तन्वीत्यादिपूर्वलक्षणैरिति शेषः। लक्षणान-न्वयाभावभ्रमसम्भावनाह गाढोत्कण्ठामिति गाढोत्कण्ठां

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः
निश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति॥२२॥

प्रबलविरहवेदनाम् (रागे त्वलब्धविषये वेदना महती तु या। संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधा इत्यभिधानात् ।) बालां गुरुषु विरहमहत्सु एषु वर्त्तमानेषु दिवसेषु गच्छत्सु सत्सु शिशिरेण शिशिरकालेन मथितां पद्मिनीं वा पद्मिनीमिव (इवयद्वाययाशब्दाविति दण्डी। अन्यरूपां पूर्वविपरीताकारां जातां मन्ये हिमहतपद्मिनीव विरहेण अन्यादृशी जातेति तर्कयामीत्यर्थः एतावता नेयमन्येति भवितव्यमिति भावः ॥ २२ ॥

नूनमिति। प्रबलरुदितेन उच्छूने स्फुटितपुटे नेत्रे यस्य तत् (उच्छूनेति श्वयतेः कर्त्तरि क्तः आदितश्चेति निष्ठानत्वं यचिस्वपोर्यादिना सम्प्रसारणं सम्प्रसारणाच्चेति पूर्वरूपत्वं हल इति दीर्घः। क्ष्वोः शूडनुनासिके चेति जडादेशे क्ते रूपसिद्धिरिति वर्त्तमानसामीप्यप्रक्रिया ग्रामादिकौल्लूतप्रे चातथा सति धातोरिकारस्य गत्वभावात् जडादेश क्वीरत्वस्वेन विशेषणाच्चेति। एतेन विवादो व्यज्यते निश्वासानाम् अशिशिरतया अत्तप्तोष्णत्वेन भिन्नवर्णः विम्बायाः अधरोष्ठो यस्य तत् हस्ते न्यस्तं हस्तन्यस्तम्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।

एतेन चिन्ता व्यक्तेति लक्षणलक्षितत्वात् संस्काराभावाद्भव्यमानकुन्तलत्वात् असकलव्यक्ति असम्पूर्णाभिव्यक्ति तस्याः प्रियायाः मुखं त्वदनुसरणेन त्वदुपरोधेन क्लिष्टकान्तेः क्षीणकान्तेः इन्दोः; दैन्यं शोच्यतां बिभर्त्ति नूनमिति वितर्कः (नूनं तर्कोऽर्थनिश्चये इत्यमरः ।) पूर्ववत् तथापि न भवितव्यमिति भावः ॥ २३ ॥

सर्वविरहिणीसाधारणानि लक्षणानि सम्भावनया उत्प्रेक्षणीयत्वाह आलोके इत्यादिभिस्त्रिभिः । हे मेघ सा तस्मिन्या बलिषु निर्वेषु प्रोषितागमनार्थेषु च देवताराधनेषु व्याकुला व्याप्ता वा विरहेण तनु कृश भावगम्यं तत्तात्पर्यस्य अदृष्टचरत्वात् सम्भाति सम्भावनयोत्प्रेक्षामित्यर्थः मत्सादृश्यं मदाकार भाव्यं मत्प्रतिकृतिमित्यर्थः (यद्यपि सादृश्यं नाम प्रसिद्धवस्त्वन्तरगतसाकारसाम्यं तथापि प्रतिकृतिलिखन विवक्षितम् इतरथा लेख्यत्वासम्भवात् अव्यक्तांशे आलेख्ये च सादृश्यमित्यभिधानाच्च ।) लिखन्ती क्वचित् फलकादौ विन्यस्यन्ती वा चित्रदर्शनस्य विरहिणोविनोदोपायत्वादिति भावः । एतच्च कामशास्त्रसंवादेन सम्यक् विवेचितमस्माभी रघुवंशसञ्जीवन्यां सादृश्यप्रतिकृतिदर्शनैः प्रियाया इत्यत्र । मधुरवचनां मञ्जुभाषिणीम्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति॥२४
उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्-
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती॥२५

अतएव पञ्जरस्थां हिंस्रेभ्यः कृतसंरक्षणामित्यर्थः सारिकां स्त्रीपक्षिविशेषं हे रसिके भर्तुः स्वामिनः स्मरसि कच्चित् स्मरसि किम् (कच्चित् कामप्रवेदने इत्यमरः।) भर्त्तारं स्मरसि किमित्यर्थः (अधीगर्थदयेशां कर्मणीति कर्मणि षष्ठी।) स्मरणे कारणमाह हि यस्मात् कारणात् त्वं तस्य भर्तुः प्रीणातीति प्रिया (इगुपधज्ञाप्रीकिर इति कप्रत्ययः।) अतः प्रेमास्पदत्वात् स्मर्तुमर्हसीति भावः इत्येवं पृच्छन्ती वा वाशब्दो विकल्पे (उपमायां विकल्पे वेत्यमरः।) ते तव आलोके दृष्टिपथे पुरा निपतति सद्यो निपतितश्चतीत्यर्थः। स्यात् प्रबन्धे पुरातीते निकटागामिके पुरेत्यमरः। यावत्पुरानिपातयोर्लडिति लट्॥ २४॥

उत्सङ्गे इति। हे सौम्य साधो मलिनवसने (प्रोषिते मलिना कृतेति शास्त्रादित्यर्थः।) उत्सङ्गे जरौ वीणां निक्षिप्य मम गोत्रं नाम अङ्कः चिह्नं यस्मिन् तत् मद्गोत्राङ्कं मन्नामाङ्कं यथा तथा (गोत्रन्तु नाम्नि चेत्यमरः)

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शेषान्मासान् विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः॥ २६॥

कुलकम्।

स्निग्धाः सख्यस्तव दिवसतां न मोक्ष्यन्ति तन्वी
मेकप्रख्या भवति हि जगत्यङ्गनानां प्रवृत्तिः।

विरचितानि पदानि यस्य तत् तथोक्तं गेयं गानार्हं प्रबन्धादि गीतमिति पाठे स एवार्थः उद्गातुम् उच्चैर्गातुं कामो यस्याः सा (तुम् काममनसोरिति मकारलोपः।) देवयोनित्वात् गान्धारग्रामं गातुकामेत्यर्थः (तदुक्तं षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः नतु गान्धारनामानं सलभ्यौ देवयोनिभिरिति।) तथा नयनसलिलैः प्रियतमस्मृतिजनितैः अश्रुभिः आर्द्रां मन्दीं कथञ्चित् कृच्छ्रेण सारयित्वा आर्द्रत्वापहरणाय करेण प्रमृज्य अन्यथाकरणनासम्भवादिति भावः भूयोभूयः पुनःपुनः स्वयम आत्मना कृतामपि विस्मरणानर्हामपीत्यर्थः मूर्च्छनां स्वरारोहावरोहक्रमम् (स्वराणां स्थापनाः सान्ताः मूर्च्छनाः सप्त सप्तहीति सङ्गीतरत्नाकरे।) विस्मरन्ती वा आलोके ते निपततीति पूर्वेणान्वयः॥ २५॥

शेषानिति। अथवा विरहस्य दिवसः तस्मात् स्थापि-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रासुपेयाः ॥०॥
सव्यापारामहनि न तथा पीड़येन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे-
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥२७॥

तस्य तत आरभ्य निर्वर्तितस्य अवधेः अन्तस्य शेषान् गतावशिष्टान् मासान् देहलीदत्तपुष्पैः देहली द्वारस्याधारदारु (गृहावग्रहणी देहलीत्यमरः ।) तत्र दत्तानि राशिरूपेण निहितानि यानि पुष्पाणि तैर्गणनया एको द्वावित्यादिसंख्यानेन भुवि भूतले विन्यस्यन्ती वा पुष्पविन्यासैर्मासान् गणयन्ती वा इत्यर्थः । यद्वा हृदये निहितः मनसि सङ्कल्पितः आरम्भः उपक्रमो यस्य तम् अथवा हृदयनिहिताः आरम्भाः चुम्बनाद्यो व्यापारा यस्मिन् तं मत्सङ्गं मत्समागमरतिम् आस्वादयन्ती वा आलोके ते निपतति इति पूर्वेण सम्बन्धः ननु कथमयं निश्चय इत्याशङ्कामर्थान्तरन्यासेन परिहरति प्रायेण बाहुल्येन अङ्गनानां रमणविरहेषु एते पूर्वोक्ता विनोदाः कालयापनोपायाः । एतेन सङ्कल्पावस्था उक्ता तदुक्तं सङ्कल्पो नाथ-
विषयो मनोरथ उदाहृत इति त्रिभिः कुलकम् ॥ २५ ॥
सव्यापारामिति । हे सखे अहनि दिवसे सव्यापारां

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।
नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या-
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥२८॥

पूर्वोक्तबलिचित्रलेखनादिव्यापारवतीं ते सखीं स्वप्रियां मद्वियोगः मद्विरह तथा तेन प्रकारेण (प्रकारवचने थाल् इति थाल्प्रत्ययः।) न पीडयेत् यथा रात्राविति शेषः किन्तु रात्रौ निर्विनोदां निर्व्यापारां ते सखीं गुरुतरा शुक् यस्याः तां गुरुतरशुचम् अतिदुर्भरदुःखां शङ्के तर्कयामि (शङ्का वितर्कभययोरिति शब्दार्णवे।) अतो निशीथे अर्द्धरात्रे उन्निद्राम् उत्सृष्टनिद्राम् अवनिरेव शयनं शय्या यस्याः तां नियमार्थं स्वखिलशायिनीं साध्वीं पतिव्रताम् (साध्वी पतिव्रतेत्यमरः।) अतो नान्यथा शङ्कितव्यमिति भावः तां त्वत्सखीं मत्सन्देशैः मदाज्ञाभिः अलं पर्य्याप्तं सुखयितुम् आनन्दयितुं सौधवातायनस्थः सन् पश्य। (सखा धात्रौ च पितरौ मित्रदूतशुकादयः सुखयन्त्योष्टकथनसुखोपायैर्वियोगिनीमिति रत्नाकरे।) दूतश्चायं मेघ इति भावः। अनेन जागरारक्षा उक्ता ॥ २७ ॥

पुनस्तामेव विशिनष्टि आधिक्षामामित्यादिभिश्चतुर्भिः। आधिना मनोव्यथया क्षामां कृशाम् (पुंस्याधिर्मानसो व्यथेत्यमरः। क्षायतेः कर्त्तरि क्तः। क्षायो म इति निष्ठातकारस्य मकारः।) विरहे शयनं तस्मिन् विरह

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं सन्निषण्णं तथैव ।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तौ
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम्॥२९

भवने पल्लवादिरचिते इत्यर्थः सन्निषण्णम् एकं पार्श्वं यस्याः तां अतएव प्राच्याः पूर्वस्याः दिशो मूले उदयगिरिप्रान्ते इत्यर्थः प्राचीग्रहणं चौषावस्थ्योतनार्थम् भूलग्रहणं दृश्यतार्थम् कलाभावं कला एव शेषो यस्याः तां हिमांशोः तनुं मूर्त्तिमिव स्थितां तथा या रात्रिः मया सार्द्धम् इच्छया कृतानि रतानि तैः (शाकपार्थिवादित्वात्मध्यपदलोपी समासः ।) क्षण इव नीतावर्षिता तां तत्क्षणतोयामिव रात्रिं विरहेण महतीं महत्त्वेन प्रतीयमानाम् उष्णैः अश्रुभिः वाष्पयन्तीम । (यतेरयन्ताच्छत्रत्ययः । अर्त्तिहीत्यादिना पुगागमः ।) स एव कालः सुखिनामल्पः प्रतीयते दुःखितान्तु विपरीत इति भावः । एतेन कार्श्यावस्था उक्ता ॥ २८ ॥

पादानिति । जालमार्गं प्रविष्टान् गवाक्षविवरं गतान् अतएव शिशिरान् इन्दोः पादान् रश्मीन् पूर्वं प्रीत्या पूर्वदेहेन पूर्वदानन्दकरा भविष्यन्तीति बुद्धेति भावः अभिमुखं यथा तथा गतं तथैव सन्निहितं यथा गतं तथैव प्रतिनिहितं तदा तेषामतीव दुःखत्वादिति भावः चक्षुः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अन्येद्युष्यामवनिशयने सन्निकीर्णैकपार्श्वां
तत्पर्य्यङ्कप्रगलितलवैश्छिन्नहारैरिवास्रैः।
भूयोभूयः कठिनविषमां सारयन्तीं कपोला-
दामोक्तव्यामयमितनखेनैकवेणीं करेण ॥०॥
निश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम्।

दृष्टिं खेदात् सलिलगुरुभिः अश्रुदुर्भरैः पक्ष्मभिः छादय-न्तीम् अतएव साभ्रे दुर्दिने अङ्गि दिवसे न प्रवृद्धां मेघावरणादविकसितां न सुप्ताम् अहरित्यसुकुलिताम् (उभयत्रापि नञर्थस्य नञन्दस्य सुप्सुपेति समासः।) स्खलकमलिनिमिव खिताम्। एतेन विषयदेषाख्या षष्ठी दशा सूचिता ॥२८॥

निश्वासेनेति। शुद्धस्नानात् तैलादिरहितस्नानात् परुषं कठिनस्पर्शं नूनम् आगण्डलम्बम् (सुप्सुपेति समासः।) अलकं चूर्णकुन्तलान् (जातावेकवचनम्।) अधरकिसलयं क्लेशयति क्लिश्नातीति वा तेन तथोक्तेन उष्णेनेत्यर्थः (क्लिश्यतेर्घञन्तात् क्लिश्नातेरण्यन्ताद्वा ताच्छील्ये णिनिः।) निश्वासेन विक्षिपन्तीं चालयन्तीं तथा स्वप्नजोऽपि स्वप्नावस्थाजन्योऽपि साचात्सम्भोगा सम्भवादिति भावः मत्सम्भोगः कथं केनापि प्रकारेण उपनयेत् आग-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मत्सम्भोगः कथमुपनयेत् स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम्३०
आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा-
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तौ
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥३१॥

क्षेत् इति आशयेनेति शेषः (इतिरौक्तार्थत्वादप्रयोगः प्रयोगे चापौनरुक्त्यमित्यालङ्कारिकाः । प्रार्थनायां लिङ् ।) नयनसलिलोत्पीडेन अश्रुप्रसृत्या रुद्धावकाशाम् आक्रान्तस्थानां दुर्लभामित्यर्थः निद्राम् आकाङ्क्षन्तीं स्वप्रहेतुत्वादिति भावः। अत्राश्रुविसर्जनेन सज्ञात्यागो व्यज्यते ॥ ३० ॥

आद्ये इति । आद्ये विरहदिवसे दाम मालां हित्वा त्यक्त्वा या शिखा बद्धा यथिता शापस्यान्ते विगलितशुचा गतशोकेन मया उद्वेष्टनीयां मोचनीयां स्पर्शक्लिष्टां स्पर्शे सति मूलकेशेषु सव्यथामित्यर्थः कठिना च सा विषमा निम्नोन्नता च ताम् (खड्गकुक्षादिवदन्यतरस्य प्राधान्यविवक्षया विशेषणं विशेष्येण बहुलमिति समासः ।) एकवेणीम् एकीभूतवेणीम् (पूर्वकालैकेत्यादिना तत्पुरुषः ।) तां शिखाम् अयमितः अकर्त्तितोपान्तो नखो यस्य तेन करेण गण्डाभोगात् कपोलविस्तारात् असकृत् मुहुर्मुहुः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सा सन्न्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वोभवति करुणावृत्तिरार्द्रान्तरात्मा ॥३२॥
जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-
दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि ।

सारयन्तीम् अपसारयन्तीं तां पश्येति पूर्वेण सम्बन्धः । असकृत् सारणात् चित्तविभ्रमदशा सूचिता ॥ ३१ ॥

सेति । अबला दुर्बला सन्न्यस्ताभरणं क्षणत्वात् परित्यक्ताभरणम् असकृत् अनेकशः दुःखदुःखेन दुःखप्रकारेण (प्रकारे गुणवचनस्येति द्विर्भावः ।) शय्योत्सङ्गे निहितं पेशलं मृदुलं गात्रं शरीरं धारयन्ती वहन्ती अनेनात्यन्तायत्तया मूर्च्छावस्था सूच्यते सा त्वत्सखी त्वामपि नवजलमयं नवाम्बुरूपम् अस्रं बाष्पं अवश्यं सर्वथा मोचयिष्यति (द्विकर्मकस्य पचादीनां चोपसंख्यानमिष्यते इति सूचेः पचादित्वात् द्विकर्मकत्वम् ।) तथाहि प्रायः प्रायेण आर्द्रान्तरात्मा मृदुहृदयः मेवस्तु द्रवान्तःशरीरः सर्वः करुणा करुणात्मिका वृत्तिः अन्तःकरणवृत्तिर्यस्य सः करुणावृत्तिर्भवति । अस्मिन्नवसरे सर्वथा शीघ्रं त्वया गन्तव्यम् अनन्तरदशापरिहारायेति सन्दर्भाभिप्रायः ॥ ३२ ॥

ननु किमिदमादिमां चक्षुःप्रीतिमुपेक्ष्य अवस्थान्तरा-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षन्ते निखिलमचिरात् भ्रातरुक्तं मया यत्३३

खेव तत्र भवान् कविराहतवान् उच्यते सम्भोगो विप्रलम्भश्च द्विधा शृङ्गार उच्यते। संयुक्तयोस्तु सम्भोगो विप्रलम्भो वियुक्तयोः। पूर्वानुरागमानाख्यप्रवासकरुणात्मना। विप्रलम्भश्चतुर्धात्र प्रज्ञासस्तत्र च त्रिधा। काम्यतः सम्भ्रमाच्छापादस्मिन् काव्ये तु शापजः। प्रागसङ्गतयोर्यूनोः सति पूर्वानुरञ्जने। चक्षुःप्रीत्यादयोऽवस्था दश स्युस्तत्क्रमो यथा। दृष्टनष्टसङ्कल्पा जागरः कृशतारतिः। क्ष्वेल्यागोन्मादमूर्च्छाप्तास्ता इत्यनङ्गदशा दश। पूर्वसङ्गतयोरेव प्रवास इति कारणात्। न तत्रापूर्ववत् चक्षुःप्रीतिरुत्पत्तिमर्हति। दृष्टनष्टस्य तु सिद्धस्याप्यविच्छेदोऽत्र वर्ण्यते। अनन्यापूर्ववद्दार्ढ्या इति तावदवस्थितेः। वैयर्थ्यादादिमां हित्वा वैरस्यादन्तिमां तथा। दृष्टनष्टादीरिहाचष्ट कविरष्टाविति स्थितेः। मत्साहस्यं लिखन्तीति पद्येऽस्मिन् प्रतिपादिता। चक्षुःप्रीतिरिति प्रोक्तं निरुत्तरकृताननम्। चक्षुःप्रीतिर्भवेच्चित्रेष्वदृष्टचरदर्शनात्। यथा मालविकारूपमग्निमित्रस्य पश्यतः। प्रोषितानान्तु भर्तॄणां क्व दृष्टादृष्टपूर्वता। अथ तत्रापि सन्देहे स्वकलत्राणि पृच्छतु। किं भर्तृप्रत्यभिज्ञा स्यात् किं वैदेशिकभावना। प्रवासादागते स्वस्मिन्नित्यन्तं कलहैर्हया॥ ३३॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति॥३४॥

ननु ईदृशीं दशामापन्नेति कथं त्वया निश्चितम् अत आह जाने इति । हे मेघ तव सख्याः मनः मयि सञ्जातस्नेहं सञ्जितानुरागं जाने अस्मात् स्नेहज्ञानकारणात् प्रथमविरहे प्रथमग्रहणं दुःखातिशयद्योतनार्थम् तत्सखीम् इत्यस्मृतां पूर्वोक्तावस्थामापन्नां तर्कयामि । ननु सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्रकटनं तत्राह वाचालमिति सुभगम् आत्मानं मन्यते इति सुभगम्मन्यः (आत्ममाने खश् चेति खश्प्रत्ययः । अकर्तरीत्यादिना सुभागमः ।) तस्य भावः सुभगम्मन्यभावः सुभगमानित्वं मां वाचालं बहुभाषिणं न करोति खलु सौन्दर्याभिमानात् प्रलपामीत्यर्थः । (स्याज्जल्पाकवाचालौ वाचाटौ बहुशर्ङ्कवागित्यमरः । आलजाटचौ बहुभाषिण्यामालच्प्रत्ययः ।) किन्तु हे भ्रातः मयोक्तं यदाधिक्षामामित्यादि तत् निखिलं सर्वम् अचिरात् शीघ्रमेव ते तव प्रत्यक्षं भविष्यतीति शेषः ॥ ३३ ॥

रुद्धेति । अलकैः रुद्धाः अपाङ्गयोः प्रसराः यस्य तत् तथोक्तम् अञ्जनेन स्नेहः स्नैग्ध्यं तेन शून्यम् अपि च किञ्च

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वामश्चास्याः करुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
सम्भोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥३५॥

भवतः मदस्य प्रत्यादेशात् निराकरणात् परित्यागादित्यर्थः (प्रत्यादेशो निराकृतिरित्यमरः ।) विस्मृतः भ्रूविलासः भ्रूभङ्गो येन तत् तथोक्तं नयनस्य रुदापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नमिति भावः त्वयि आसन्ने सति स्वकुशलवार्त्तां शंसिनीति शेषः उपरि ऊर्द्धभागे स्पन्दते स्फुरति इति उपरिस्पन्दि(तथाच निमित्तनिदाने स्पन्दाम्बूर्ध्वं च्युतलाभं भाले पट्टं शुभं भ्रुवि । इष्टप्राप्तिं दृशोरूर्द्धमंपाङ्गि हानिमदिग्धेदिति ।) (मृगाक्ष्याः तत्सख्याः नयनं वामम्इति शेषः) वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः । दानं देवादिपूजायां सन्देऽलङ्करणेऽपि चेति स्त्रीणां वामभाग प्राशस्त्यात् ।) मौनक्षोभात् मौनचलनात् चलस्य कुवलयस्य श्रिया शोभया तुलां सादृश्यम् एष्यतीति शङ्के तर्कयामि ॥ ३४ ॥

वाम इति । मदीयैः करुहपदैर्नखपदैः । पुनर्भवः (करुहो नखोऽस्त्री नखरोऽस्त्रियामित्यमरः ।) मुच्यमानः परिक्षीयमाणः नखाङ्करहित इत्यर्थः । चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौक्तिकसरमयं कटिभूषणं दैवगत्या

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥३९॥

दैववशेन त्याजितः । सम्प्रति नखपदोद्भाभावेन शोतोप-चारस्य तस्य वैयर्थ्यादिति भावः । त्यजतेर्ण्यन्तात् कर्म्म-वर्त्तरि क्तः । पचादित्वात् द्विकर्म्मकत्वम् । सम्भोगान्ते मम हस्तसंवाहनानां हस्तेन मर्दनानाम् । (संवाहनं मर्दनं स्यादित्यमरः ।) समुचितो योग्यः सरसो रसार्द्रः परिपक्को न शुष्कश्च विवक्षितः तत्रैव पाण्डिमसम्भवात् । स चासो कलोत्तप्तश्च स इव गौरः पाण्डुरः । (गौरः करीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि चेति मालतीमालायाम् ।) अस्याः प्रियायाः वाम ऊरुचलत्वं स्खलनं यास्यति प्राप्-स्यति । ऊरोः स्खलाद्गतिं विन्द्यादूर्वोः प्राप्तिं सुवास स इति निमित्त निदाने ॥ ३५ ॥

तस्मिन्निति । हे जलद ! तस्मिन् काले त्वदुपसर्पण-काले सा यस्मिया लब्धं निद्रासुखं यया तादृशी स्याद्यदि स्याच्चेत् एनां निद्राणामन्वास्य पश्चादासित्वेत्यर्थः ।) उप-सर्गवशात्सकर्म्मकत्वम् ।) स्तनितविमुखो गर्जितपराङ्मुखो निःशब्दः सन् अन्यथा निद्राभङ्गः स्यादिति भावः । याम-मात्रं प्रहरमात्रम् । (द्वौ यामप्रहरौ समावित्यमरः ।)

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः॥३७॥

सहस्व प्रतीक्षस्व। प्रार्थनायां लोट्। गच्छतोरेकवार सुरतस्य यामावधिकत्वात् स्वप्नेऽपि तथा भवितव्यमित्यभिप्रायः। तथा च रतिसर्वस्वे। एकवारावधिर्यामो रतस्य परमो मतः। चन्द्रगच्छिमतोर्यूनोरद्भुतक्रमवर्त्तिनोरिति। यामसहनस्य प्रयोजनमाह मा भूदिति। अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथञ्चित् कृच्छ्रेण स्वप्नलब्धे सति गाढोपगूढं गाढालिङ्गनम्। (नपुंसके भावे क्तः।) सद्यस्तत्क्षणं कण्ठात् च्युतः भुजलतयोर्ग्रन्थिबन्धो यस्य तथाभूत मास्तु कथञ्चिल्लब्धालिङ्गनस्य विधातो माभूदित्यर्थः। न चात्र निद्रोक्तिस्तामुन्निद्रामिति पूर्वोक्तेन विरुध्यते पुनः सप्तम्याद्यवस्थासु पाक्षिकनिद्रासम्भवात्। तथा च रसरत्नाकरे। (आसक्तौ रोदनं निद्रा निर्लज्जानर्थवाग्भ्रमः। सप्तमादिषु जायन्ते दशाभेदेषु वासुके इति)॥ ३६॥

तामिति। तां प्रियां स्वस्य जलकणिकाभिर्जलबिन्दुभिः शीतलेनानिलेनोत्थाप्य प्रबोध्य। एतेन तस्याः प्रभुत्वाद्राजनानिलसमाधिर्व्यज्यते। यथाह भोजराजः। मृदुभिर्मर्दनैः पादे शीतलैर्व्यजनैः स्तनौ। श्रुतौ च मधुरै-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

भर्त्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्सन्देशैर्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ३८

गीतैर्निद्रातो बोधयेत् प्रभुमिति । अभिनवैर्मालतीनां जालकैः सम जातीमुकुलैः सह । सुमनामालती जातिरिति । साकं सत्रासमं सहेति । (चारको जालकं क्लीवे कलिका कोरकः पुमानिति चामरः ।) प्रत्याश्वस्तां सुस्थिताम् । अन्यत्र पुनरुच्छ्वसिताम् । (श्वसेः कर्त्तरि क्तः ।) एतेनास्याः सौकुमार्य्यं गम्यते । त्वत्सनाथे त्वत्सहिते । गवाक्षे स्तिमितनयनां कोऽसाविति विस्मयान्निश्चलनेत्रां मानिनीं मनस्विनीं जनानोचित्यासहिष्णुमित्यर्थः ।(विद्युत् गर्भा अन्तःस्था यस्य स विद्युद्गर्भः अस्तर्लीनविद्युत्क इत्यर्थः । गर्भोपवरकेऽन्तःस्थे गर्भोऽग्नौ कुक्षिणोऽर्भके इति शब्दार्णवः ।) दृष्टिप्रतिघातेन वक्त्रमुखावलोकनप्रतिबन्धकत्वान्न विद्युताद्योतितव्यमिति भावः । धीरो धैर्य्यविशिष्टश्च सन् अन्यथा शोलत्वादिनैतदनाख्यासनप्रसङ्गादिति भावः । स्तनितवचनैः स्तनितान्येव वचनानि तैर्वक्ष्यमेवार्थं प्रक्रमेथा उपक्रमस्व । (विध्यर्थे लिङ् । प्रोषाभ्यामित्यात्मनेपदम्) ॥३७॥

सम्प्रति दूतस्य शीघ्रजनाभिमुखीकरणाचातुरीमुपदिशति, भर्त्तरिति । विधवा गतभर्तृका न भवतीति अविधवा सभर्तृका हे अविधवे ! अनेन भर्तृजीवनसूच-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

दृष्ट्वाख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैवम्।
श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः सङ्गमात्किञ्चिदूनः॥३९॥

नादनिष्टाशङ्कां वारयति। मां तव भर्तुः प्रियं मित्रं प्रियसुहृदं तत्रापि हृदयनिहितैर्मनसिस्थापितैस्तत् सन्देशैस्तस्य भर्तुः सन्देशैस्त्वत्समीपमागतं भर्तुः सन्देशकथनार्थमागतमित्यर्थः। अम्बुवाहं मेघं विद्धि जानीहि। न केवलमहं वार्ताहरः किन्तु घटकोऽपीत्याशयेनाह योऽम्बुवाहोमन्द्रस्निग्धैः स्निग्धगम्भीरैः ध्वनिभिः करणैः अवज्ञानां स्त्रीणां वेगयत्तासां मोघे मोचने उत्सुकानि पथि श्राम्यतां श्रान्तिमापन्नानां प्रेषितानां प्रवासिनां पान्थानामित्यर्थः हृदयानि सङ्गान् त्वरयति। पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति भावः॥ ३८॥

भर्तृसख्यादिज्ञापनस्य फलमाह इतीति। इत्येवमाख्याते पवनतनयं हनूमन्तं मैथिली सीतेव सा मत्प्रिया उन्मुखी उत्कण्ठया औत्सुक्येन उच्छ्वसितहृदया विकसितचित्ता च सती त्वां वीक्ष्य सम्भाव्य सत्कृत्य अस्मात् भर्तृ मैत्री ज्ञापनात्परं सर्वं श्रोतव्यम् अवहिता अप्रमत्ता सती श्रोष्यति च। अत्र सीता हनूमदुपाख्यानादस्याः पातिव्रत्यं मेघस्य दूतगुणसम्पत्तिश्च व्यज्यते। तद्गुणाः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तामायुष्मन्मम च वचनादात्मनश्चोपकर्त्तुं
ब्रूयादेवं तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥४० ॥

रमाकरे । (ब्रह्मचारी बली धीरो मायावी मानवर्जितः ।
धीमानुदारो निःशङ्को वक्ता दूतः स्त्रियां भवेदिति ।) ननु
वार्त्तामात्रव्यवसादस्याः को लाभ इत्याशङ्क्यार्थान्तरमुपन्य-
स्यति । हे सौम्य ! साधो सीमन्तिनीनां वधूनाम् ।
नारी सीमन्तिनी वधूरित्यमरः । सुहृदा सुहृन्मुखेनोप-
नतः प्राप्तः । सुहृत्पदं विप्रलम्भशङ्कानिवारणार्थम् ।
कान्तस्योदन्तो वार्त्ता कान्तोदन्तः । (वार्त्ता प्रवृत्ति-
र्वृत्तान्त उदन्तः स्यादित्यमरः ।) सङ्गमात् कान्तसम्भोगात्
किञ्चिदूनः ईषदूनः तदेवानन्दकारीत्यर्थः ॥ ३९ ॥

सम्यति सन्दिशति तामिति । हे आयुष्मन् ! प्रशं-
सायां मतुप् । परोपकारश्लाघ्यजीवितेत्यर्थः । मम वचनं
प्रार्थनावचनं तस्माच्च आत्मनः स्वस्योपकर्त्तुञ्च परोपकारेणा-
त्मानं कृतार्थयितुमित्यर्थः । (उपकारक्रिया प्रतिकर्म्मत्वेऽपि
तस्यानुकरोतीत्यादिवत्सम्बन्धमात्रविवक्षायामात्मन इति
षष्ठी न विरुध्यते ।) यथाह भारविः । (सा लक्ष्मीरुप-
कुरुते यया परेषामिति । तथा श्रीहर्षश्च । साधूनामुपकर्त्तुं
लक्ष्मीं द्रष्टुं विहायसा गन्तुमिति ।) तां प्रियामेवं ब्रूयात्

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
सासेनाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः॥४१॥

भवानिति शेषः । किमित्याह हे अबले ! तव सहचरो भर्त्ता रामगिरेश्चित्रकूटस्थाश्रमेषु तिष्ठतीति रामगिर्याश्रमस्थः सन्न व्यापन्नः न मृतः । अमरणे हेतुमाह वियुक्तो वियोगं प्राप्तो दुःखी सन् त्वां कुशलं पृच्छति दुःखादित्वात् पृच्छतेर्द्विकर्मकत्वम् । तथा हि सुलभविपदामयत्नसिद्धविपत्तीनां प्राणिनाम् एतदेव कुशलमेव पूर्वाभाष्यम् एतदेव प्रथममवश्यं प्रष्टव्यम् । कृत्याश्चेत्यावश्यकार्थे खप्रत्ययः ॥ ४० ॥

अङ्गेनेति । किञ्च दूरवर्त्ती दूरस्थः । न चागन्तुं शक्यतइत्याह वैरिणा विरोधिना विधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा स ते सहचरः तनुना कृशेन गाढतप्तेनात्यन्तसन्तप्तेन सासेन साश्रुणा जातोत्कण्ठा वेदना अस्य जाता उत्कण्ठितः तेनोत्कण्ठितेन । (तदस्य सञ्जातमित्यादिना इतचप्रत्ययः । उत्कण्ठतेर्वा कर्त्तरि क्तः ।) समधिकतरमधिकमुच्छ्वसितीति समधिकरोच्छ्वासी तेन दीर्घनिश्वासिनेत्यर्थः । अङ्गेन स्वशरीरेण प्रतनु कृशं तप्तं सन्तप्तमश्रुद्रुतमश्रुक्लिन्नम् । (अश्रु नेत्राम्बुरोदनञ्चास्रमस्तु चेत्त-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥४२॥

मरः ।) अविरतोत्कण्ठमविच्छिन्नवेदनम् उष्णोच्छ्वासं तीव्र-निःश्वासम् । (तिग्मं तीव्रं खरं तीक्ष्णं चण्डमुष्णं समं ऋतमिति हलायुधः ।) अङ्गं त्वदीयं तैः स्वसंवेद्यैः सङ्ख्यै-र्मनोरथैर्विग्रत्येकीभवतीत्यर्थः । अत्र समरागित्वद्योतनाय नायकेन नायिकायाः समानावस्थत्वमुक्तम् ॥ ४१ ॥

सम्प्रति स्वावस्थानिवेदनाय प्रस्तौति शब्दाख्येय-मिति । हे अबले ! यस्ते प्रियः सखीनां पुरस्तादग्रे आननस्पर्शं त्वन्मुखसम्पर्कं लोभात् शब्दाख्येयं शब्देन रवेणाख्येयम् उच्चैर्वाच्यमपि यत् तद्वचनमपीति शेषः । कर्णे कथयितुं लोलो लालसोऽभूत् किल । (लोलुपो लोलभो लोलो लालसो लम्पटोऽपि चेति यादवः । श्रवण-विषयं कर्णपथम् अतिक्रान्तः तथा लोचनाभ्यामदृष्टः । अतिदूराद्द्रष्टुं श्रोतुञ्च न शक्य इति भावः । स ते प्रियः त्वाम् उत्कण्ठया विरचितानि पदानि (सुप्तिङन्तशब्दाः वाक्यानि वा यस्य तत्तथोक्तम् । पदं शब्दे च वाक्ये चेति विश्वः) । इदं वक्ष्यमाणं मन्मुखेनाह सन्मुखेन स एव ब्रूते इत्यर्थः ॥ ४२ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन्क्वचिदपि ते चण्डि सादृश्यमस्ति४२

सादृश्यप्रतिकृतिस्वप्नदर्शनतद्वृक्षस्पृष्टसर्शाख्यानि चत्वारि विरहिणां विनोदस्थानानि तथा चोक्तं पताकायाम्। वियोगावस्थासु प्रियजनसङ्गानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि। तदङ्गस्पृष्टानामुपनतवतां दर्शनमपि प्रतीकारोऽनङ्गव्यथितमनसां कोऽपि गदित इति। तत्र सदृशवस्तु दर्शनमाह।

श्यामास्विति। श्यामासु प्रियङ्गुलतासु। (श्यामा तु महिलाह्वया लता गोवल्ली गुन्द्रा प्रियङ्गुः फलिनी फलीत्यमरः।) अङ्गं शरीरमुत्पश्यामि सौकुमार्यादिसाम्यादङ्गमिति तर्कयामीत्यर्थः। तथा चकितहरिणीनां प्रेक्षणे दृष्टिपातं शशिनि चन्द्रे वक्त्रच्छायां मुखकान्तिं तथा शिखिनां बर्हिणां बर्हभारेषु बर्हसमूहेषु केशान् प्रतनुषु स्वल्पासु नदीनां वीचीषु। अत्र वीचीनां विशेषणोपादानेन तानुक्तगुणग्रहो दोषः सामान्यनिर्वाहाय महत्त्वदोषनिराकरणार्थत्वादर्थत्वात्तस्येति। तदुक्तं रसरत्नाकरे। (नानुत्पादे गुणोत्कर्षे भोगोक्तौ दोषवारणे। विशेषणादिदोषस्य तात्स्यनुक्तगुणाग्रह इति।) भ्रूविलासान्। भ्रूपताका इति पाठे भ्रुवः पताका (इवेत्युपमितसमासः।) उत्पश्या-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥४४॥

मोति सर्वत्र सम्बध्यते । तथापि नास्ति मनोनिर्वृतिरित्याशयेनाह हन्तेति हन्तविषादे । हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरित्यमरः । हे चण्डि ! अतिकोपने । (चण्डस्त्वत्यन्तकोपन इत्यमरः । गौरादित्वात् ङीष् ।) उपमानकथनमात्रेण न कोऽपि तत्त्यमिति भावः । क्वचिदपि कस्मिन्नप्येकस्मिन् वस्तुनि ते तव सादृश्यं नास्त्यतो न निर्वृणोमीत्यर्थः । अनेन अस्य सौन्दर्यमनुपममिति व्यज्यते॥४३॥

सम्प्रति प्रतिकृतिदर्शनमाह त्वामिति । हे प्रिये ! प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्थायुक्तां त्वां त्वत्प्रतिकृतिमित्यर्थः धातवः गैरिकादयः (धातुर्वातादिशब्दादिर्गैरिकादिष्वजादिष्विति यादवः ।) ते एव रागाः रञ्जकद्रव्याणि (चित्रादिरञ्जकद्रव्ये लाक्षादौ प्रणयेच्छयोः । सारङ्गादौ च रागः स्यादारक्ते रञ्जने पुमानिति शब्दार्णवे ।) तैः धातुरागैः शिलायां शिलापट्टे आलिख्य निर्माय आत्मानं मां मत्प्रतिकृतिमित्यर्थः ते तव चित्रगतायाः इत्यर्थः चरणपतितं कर्तुं तथा लिखितुं यावत् इच्छामि तावत् इच्छासमकालं मुहुः उपचितैः प्रवृद्धैः अस्रैः अश्रुभिः कर्तृभिः (अस्रमश्रुणि शोणिते

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

धारासिक्तस्थलसुरभिणंस्त्वन्मुखस्यास्य बाले
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
घर्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि ॥०॥
मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।

इति विश्वः । मे दृष्टिः आलुप्यते आवियते इत्यर्थः ततः दृष्टिप्रतिबन्धात् लेखनं प्रतिबध्यते इति भावः क्रूरः घातुकः (दृग्यंसो घातुकः क्रूर इत्यमरः ।) कृतान्तः दैवम् (कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसित्यमरः ।) तस्मिन्नपि चित्रेऽपि नौ आवयोः (युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नाविति नावादेशः ।) सङ्गमं सहवासं न सहते । सङ्गमलेखनमप्यावयोरसहमानं दैवमावयोः साक्षात् सङ्गमं न सहते इति किमु वक्तव्यम् इति अपिशब्दार्थः ॥ ४४ ॥

अधुना स्वप्नदर्शनमाह मामिति । सुप्तस्य विज्ञानं स्वप्नः (स्वप्नः सुप्तस्य विज्ञानमिति विश्वः ।) सन्दर्शनं संवित् (दर्शनं समवे शास्त्रे दृष्टौ स्वप्नेऽक्षि संविदीति शब्दार्णवे ।) स्वप्ना इति सन्दर्शनानि स्वप्नज्ञानानि चूतलतादिवत् सामान्यविशेषभावेन सहप्रयोगः तेषु मया कथमपि महता प्रयत्नेन लब्धायाः गृहीतायाः दृष्टायाः इति यावत् ते तव निर्दयाश्लेषः गाढालिङ्गनं स एव हेतुः तस्य निर्द-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥४५॥
भित्त्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।

याञ्चेषार्थमित्यर्थः (षष्ठी हेतुप्रयोग इति षष्ठी।) आकाशे निर्विषये प्रणिहितभुजं प्रसारितबाहुं मां पश्यन्तीनां स्थलीदेवतानां मुक्ताः मौक्तिकानि इव स्थूलाः अश्रुलेशाः वाष्पबिन्दवः तरुकिसलयेषु अनेन चेलाञ्चलेन अश्रु धारणसमाधिर्ध्वन्यते बहुशो न पतन्तीति न किन्तु पतन्त्येव इत्यर्थः। (निश्चये नञ्द्वयप्रयोगः तथा चालङ्कारिकसूत्रं स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोग इति। महात्मगुरुदेवानामश्रुपातः चिन्तो यदि। देशभ्रंशो महादुःखं मरणञ्च भवेद् ध्रुवमिति चिन्तौ देवताश्रुपातनिषेधदर्शनात् यत्तस्य मरणाभावसूचनार्थं तरुकिसलयेषु पतन्तीत्युक्तम् ॥ ४५ ॥

इदानीं तदङ्गस्पृष्टवस्तुस्पर्शनमाह भित्त्वेति। देवदारुद्रुमाणां किसलयपुटान् पल्लवपुटान् सद्यः भित्त्वा ये तत्क्षीरस्रुतिसुरभयः तेषां देवदारुद्रुमाणां क्षीरस्रुतिभिः क्षीरनिष्यन्दैः सुरभयः सुगन्धयः तुषाराद्रिवातस्ते लिङ्गमिदं ये वाताः दक्षिणेन दक्षिणमार्गेण (ह्रतौयाविधाने प्रकृत्यादिश्च उपसंख्यानात् ह्रतौवा समेन यातीतिवत् तत्रापि करणत्वस्य प्रतीयमानत्वात् कर्तृकरणयोरिव ह्रतौयेति भाष्यकारः।) प्रवृत्ताः चलिताः हे गुणवति

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥४६॥
सङ्क्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः॥४७॥

सौगोल्यसौकुमार्यादिगुणसम्पन्ने ते तुषाराद्रिवाताः पूर्वं प्राक् एभिः वातैः तव अङ्गं स्पृष्टं भवेत् यदि किलेति सम्भावितमेतदिति बुद्ध्येत्यर्थः (वार्त्तासम्भाव्ययोः किलेत्यमरः।) मया आलिङ्ग्यन्ते आश्लिष्यन्ते। अत्र वायूनां स्पृश्यत्वेऽपि) असूर्त्तत्वेन आलिङ्गनायोगात् आलिङ्ग्यन्ते इत्यभिधानं यत्तस्य उन्मत्तत्वात् प्रलपितमित्यदोष इति वदन् निरुक्तकारः स्वयमेव उन्मत्तप्रलापोत्प्रेक्षणीयः ॥४६॥

संक्षिप्येतेति। दीर्घाः यामाः प्रहराः यस्यां सा दीर्घयामा विरहवेदनया तथा प्रतीयमानेत्यर्थः त्रियामा रात्रिः (आद्यन्तयोर्द्वयामयोर्दिनव्यवहारात् त्रियामेति चोरस्वामी।) क्षण इव कथं केन प्रकारेण संक्षिप्येत लघूक्रियेत अहः अपि सर्वावस्थासु सर्वकालेषु इत्यर्थः मन्दमन्दोमन्दरप्रकारः (प्रकारे गुणवचनस्येति द्विरुक्तिः। कर्मधारयवदुत्तरेष्विति कर्मधारयवद्भावात् सुपो लुक्।) मन्दमन्दातपम् अत्यल्पसन्तापं कथं स्यात् न स्यादेव हे

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मागमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४८॥

चटुलनयने चञ्चलाक्षि इत्थम् अनेन प्रकारेण दुर्लभप्रार्थनम् अप्राप्यमनोरथं मे मम चेतः गाढोष्माभिः अतितीव्राभिः त्वद्वियोगव्यथाभिः अधरणम् अनाथं कृतम् ॥४७॥

न च मदीयदुर्दशाश्रवणेन भेतव्यमित्याह नन्विति। ननु इति आमन्त्रणे (प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननित्यमरः।) ननु प्रिये बहु विगणयन् प्रायान्ते सति एवमेवं करिष्यामीति आवर्त्तयन् आत्मानं आत्मनैव स्वेनैव (प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया।) अवलम्बे धारयामि यथाकथञ्चित् जीवामि इत्यर्थः। तत् तस्मात् कारणात् हे कल्याणि सुभगे त्वत्सौभाग्येनैव जीवामीति भावः (वह्वादिभ्यश्चेति ङीष्।) त्वमपि नितरां अत्यन्तं कातरत्वं भीरुत्वं मा गमः मा गच्छ (गमेर्माङि लुङ्। न माङ्योगे इत्यडागमाभावः।) तादृक्सुखिनोरावयोः ईदृशि दुःखे कथं न विषमीत्याशङ्क्याह कस्येति कस्य जनस्य अत्यन्तं नियतं सुखम् उपनतं प्राप्तम् एकान्ततः नियमेन दुःखं वा उपनतं किन्तु दशा अवस्था चक्रस्य रथाङ्गस्य नेमिः अन्तः (चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमानित्यमरः।) तस्याः क्रमेण परीपाट्या (क्रमः शक्तौ परीपाट्या-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

आपान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानत्यान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु॥४९॥

मिति विश्वः ।) नीचैः अधः उपरि च गच्छति प्रवर्त्तते जन्तोः सुखदुःखे पर्य्यावर्त्तेते इत्यर्थः ॥ ४८ ॥

न च निरवधिकमेतद्दुःखमित्याह आपान्त इति । शार्ङ्गं नाम धनुः पाणौ स्थितं यस्य तस्मिन् शार्ङ्गपाणौ विष्णौ (सप्तम्युपमानेत्यादिना बहुव्रीहिः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यात् पाणिशब्दस्योत्तरनिपातः ।) भुजगः शेष एव शयनं तस्मात् उत्थिते सति मे आपान्तः आपावसानम् भविष्यतीति शेषः शेषान् अवशिष्टान् चतुरो मासान् मेघदर्शनप्रभृति हरिबोधनदिनान्तमित्यर्थः दशदिवसाधिक्यन्तु न विवक्षितमित्युक्तमेव लोचने मीलयित्वा निमील्य गमय धैर्य्येण अतिवाहय इत्यर्थः पश्चात् अनन्तरं त्वञ्च अहञ्च आवाम् (त्वादादीनि सर्वैर्नित्यमित्येकशेषः । त्वदादीनां मिथो द्वन्द्वे यत्परं तच्छिष्यते इति अस्मदः शेषः ।) विरहे गणितम् एवमेवं करिष्यामीति मनसि आवर्त्तितं तं तम् (वीप्सायां द्विरुक्तिः ।) आत्मनोः आवयोः अभिलाषं मनोरथं परिणताः शरच्चन्द्रिकाः यासां तासु क्षपासु रात्रिषु निर्वेक्ष्यावः भोक्ष्यावहे । विपूर्वेक्ष्ट् । निर्वेशो रतिभोगयोरित्यमरः ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति॥५०॥

अत्र कश्चित् नभोनभस्ययोरेव वार्षिकत्वात् कथमाषाढादि चतुष्टयस्य वार्षिकत्वमुक्तमिति चोदयित्वा ऋतुत्रयपश्चात्ययणादविरोध इति पर्य्यहारि तत्सर्वमसङ्गतम् अत्र गतशेषाश्चत्वारो मासा इत्युक्तं कविना नतु ते वार्षिका इति तस्मादनुक्तोपालम्भ एव। यच्च नाथिनोक्तं कथमाषाढादि चतुष्टयात् परं शरत्काल इति तत्रापि आ कार्त्तिकसमाप्तेः शरत्कालानुवृत्तेः परिणतशरच्चन्द्रिकासु इत्युक्तं नतु तदैव शरत्प्रादुर्भाव उक्त इत्यविरोध एव॥ ४९॥

सम्प्रति तस्या मेघवच्चकत्वशङ्कानिरासाय अतिगूढमभिज्ञानमुपदिशति भूय इति। हे अबले भूयः पुनरपि आह त्वङ्कर्त्ता मन्मुखेनेति शेषः मेघवचनमेतत् किमित्यत आह पुराशब्दश्चिरातीते (स्यात् प्रबन्धे चिरातीते निकटागामिके पुरेत्यमरः।) पुरा पूर्वं शयने मे कण्ठलग्नापि त्वं गले बद्धस्य कथमपि गमनं न सम्भवेदिति भावः निद्रां गत्वा किमपि केन वा निमित्तेन इत्यर्थः सस्वरं सशब्दम् उच्चैरित्यर्थः रुदती सती विप्रबुद्धा आसीरिति शेषः। असकृत् बहुशः पृच्छतः रोदनहेतुमिति शेषः मे मम हे कितव त्वं कामपि रमयन् मया स्वप्ने दृष्ट इति त्वया

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः।

सान्तर्हासं समन्दहासं यथा तथा कथितञ्च इति खड्गर्त्ता भूयश्चाहेति योजना ॥ ५० ॥

एतस्मादिति। एतस्मात् पूर्वोक्तात् अभिज्ञायतेऽनेनेति अभिज्ञानं लक्षणं तस्य दानात् प्रापणात् मां कुशलिनं क्षेमवन्तं विदित्वा ज्ञात्वा हे असितनयने कृष्णे जनसमूहे भवात् कौलीनात् लोकप्रवादात् एतावता कालेन परासुर्नो चेत् आगच्छतीति जनप्रवादादित्यर्थः (स्यात् कौलीनं लोकवादे युद्धे पक्षहिपक्षिणामित्यमरः।) मयि विषये अविश्वासिनी मरणशङ्किनी मा भूः न भव (भवतेर्लुङ् न माङ्योगे इत्यडागमप्रतिषेधः।) नच दीर्घकालविप्रकर्षात् पूर्वस्नेहनिवृत्तिः शङ्क्या इत्याह स्नेहानिति किमपि किंवा निमित्तं न विद्यते इति शेषः स्नेहान् प्रीतीः विरहे सति अन्योन्यविप्रकर्षे सति ध्वंसिनः विनश्वरान् आहुः तत् तथा न भवतीति अभिप्रायः किन्तु ते स्नेहा अभोगात् विरहे भोगाभावात् हेतोः (प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते।) इष्टे वस्तुनि विषये उपचितः रसः स्वादः येषु ते उपचितरसाः सन्तः प्रवृद्धतृष्णा इत्यर्थः (रसो गन्धे रसः स्वादे तिक्तादौ विषरागयोरिति विश्वः।) प्रेमराशयो भवन्ति वियोगासहिष्णुत्वमापद्यन्ते इत्यर्थः। स्नेहप्रेम्णोरवस्थाभेदाद्भेदः तदुक्तम् आलोकनाभिलाषो रागस्नेहो

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति॥५१॥
आश्वास्यैवं प्रथमविरहोद्ग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
सामिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः॥ ५२॥

ततः प्रेमा। रतिशृङ्गारौ योगे वियोगतो विप्रलम्भ-
श्चेति। तदेव स्फुटीकृतं रसाकरे प्रेमा दिष्ट्वा रम्येषु
तच्चित्ता त्वभिलाषकः। रागस्तल्लब्धबुद्धिः स्यात् स्नेहस्तत्-
प्रवणक्रिया। तद्वियोगासहं प्रेमरतिस्तल्लब्धवर्त्तनम्।
शृङ्गारस्तत्समः क्रीड़ा संयोगः सप्तधा क्रमादिति ॥ ५१ ॥

इत्थं स्वकुशलं सन्दिश्य तत्कुशलसन्देशानयनमिदानीं
याचते आश्वास्येति। प्रथमविरहेण उद्ग्रशोकां तीव्र-
दुःखां ते सखीम् एवं पूर्वोक्तरीत्या आश्वास्य उपजीव्य
त्रिनयनस्य त्र्यम्बकस्य वृषेणवृषभेण उत्खाताः अवदा-
रिताः कूटाः शिखराणि यस्य तस्मात् (कूटोऽस्त्री शिखरं
शृङ्गमित्यमरः।) शैलात् कैलासात् आशु निवृत्तः प्रत्या-
वृत्तः सन् साभिज्ञानं सलक्षणं यथा तथा प्रहितं प्रेषितं
कुशलं येषु तैः तस्याः त्वत्सख्याः वचोभिः ममापि प्रातः-
कुन्दप्रसवमिव शिथिलं दुर्बलं ममजीवितमपि धारयेथाः
स्थापय। (प्रार्थनायां लिङ्।) ॥ ५२ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥५३॥

सम्प्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्वकं कल्पयति कच्चिदिति । हे सौम्य साधो इदं मे बन्धुकृत्यं बन्धुकार्य्यम् देवदत्तस्य गुरुकुलमितिवत्प्रयोगः ।) व्यवसितं कच्चित् करिष्यामीति निश्चितं किम् (कच्चित् कामप्रवेदने इत्यमरः । अभिप्रायज्ञापनं काम प्रवेदनम् ।) न च ते तूष्णीम्भावादनङ्गीकारं शङ्के यतस्ते स एव उचित इत्याह प्रत्यादेशात् करिष्यामीति प्रतिवचनात् (उक्तिराभाषणं वाक्यमादेशो वचनं वच इति शब्दार्णवे ।) भवतः तव धीरतां गम्भीरत्वं न तर्कयामि न समर्थये खलु । तर्हि कथमङ्गीकारज्ञानं तत्राह याचितः सन् निःशब्दोऽपि निर्गर्जितोऽपि अप्रतिजानानोऽपीत्यर्थः चातकेभ्यः जलं प्रदिशसि ददासि । युक्तश्चैतदित्याह हि यस्मात् सतां सत्पुरुषाणां प्रणयिषु याचकेषु विषये ईप्सितार्थक्रियैव अर्पितार्थसम्पादनमेव प्रत्युक्तं प्रतिवचनं क्रिया केवलमुत्तरमित्यर्थः । गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो मेघः । नीचो वदति न कुरुते न वदति सुजनः करोत्येव इति भावः ॥ ५३ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।
इष्टान् देशान् जलद विचर प्रावृषा सम्भृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः॥५४॥
तत्सन्देशं जलधरवरो दिव्यवाचाचचक्षे
प्राणांस्त्यक्त्वा जलहितरतो रक्षितुं यक्षबध्वाः।
प्रायोदन्तं प्रमुदितमना: सापि तस्यौ स्वभर्तुः
केषां न स्याद्वितथफलता प्रार्थनाभ्युन्नतेषु॥५५॥
श्रुत्वा वार्त्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः।

सम्प्रति स्वापराधसमाधानपूर्वकं स्वकार्यस्य अवश्यकरणं प्रार्थयमानो मेघं विसृजति एतदिति। हे जलद सौहार्दात् सुहृद्भावात् वा (हृद्भगसन्ध्यन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः।) विधुरः वियुक्तः इति हेतोः मयि विषये अनुक्रोशबुद्ध्या करुणाबुद्ध्या वा अनुचिता तव अननुरूपा या प्रार्थना प्रियां प्रति सन्देशं मे हरेत्येवं रूपा तत्र वर्त्तिनः निर्बन्धपरस्य मे मम एतत् सन्देशहरणरूपं प्रियं कृत्वा सम्पाद्य प्रावृषा वर्षाभिः (स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः इत्यमरः।) सम्भृतश्रीः उपचितशोभः सन् इष्टान् अभिलषितान् देशान् विचर यथेष्टदेशेषु विहर इत्यर्थः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ
भोगानिष्टानभिरतसुखं भोजयामास शश्वत् ॥०॥

इति श्रीमहाकवि कालिदासकृतं मेघदूतं समाप्तम् ।

(देश कालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणामिति वचनात् कर्मत्वम् । एवं महत् चिरमपि स्वल्पकालमपि ते तव विद्युता कलत्रेण इति शेषः विप्रयोगः विरहः मा भूत् मास्तु । (काङ्क्षित्याशिषि सुङ् ।) अन्ते काव्यस्य नित्यत्वात् कुर्यादाशिषमुत्तमाम् । सर्वत्र व्याप्यते विद्वान् नायकेच्छानुरूपिणीमिति सारस्वतालङ्कारे दर्शनात् काव्यान्ते नायकेच्छानुरूपोऽयमाशीर्वादः प्रयुक्त इत्यनुसन्धेयम् ॥ ५४ ॥

इति श्रीमद्दोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीवन्याख्यायामुत्तरमेघः ।

समाप्तोऽयं ग्रन्थः ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri



CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri